DIPLOMA IN SANSKRIT

Paper - III (Part - B)

# SHABDAMANJARI / DHATUMANJARI

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha

Tirupati - 517 501(A.P.)

# UNIT; I : अजन्त-साधारणशब्दाः

**I.0.परिचयः**

**I.1.लक्ष्याणि**

**I.2.1.अजन्त-साधारणशब्दाः**

**I.1.1.अजन्त(=अच् + अन्त)पुंलिङ्ग-साधारणशब्दाः।**

**I.1.2.अजन्त(=अच् + अन्त)स्त्रीलिङ्ग-साधारणशब्दाः।**

**I.1.3.अजन्त(=अच् +अन्त)नपुंसकलिङ्ग-साधारणशब्दाः।**

**I.3.उपसंहारः**

**I.4.अभ्यासः**

## I.0.परिचयः

भाषायां हि द्वौ मौलिकौ अंशौ स्तः। तयोः एकः, शब्दः। अपरः अर्थः। तत्र अर्थः नाम वस्तु वा विषयः वा भवति। सः च सर्वदा शब्देन एव बोध्यते। नाम, शब्दः एव= शब्दस्य उच्चारणम् एव, अर्थं बुद्धौ उपस्थापयति। शब्दप्रयोगं विना= शब्दस्य उच्चारणं विना अर्थः कदापि बुद्ध्युपारूढः भवितुं समर्थः न भवति। वस्तुनः वा विषयस्य वा अनुपस्थापकः शब्दः अपि न विद्यते। एवं शब्द-अर्थयोः सम्बन्धः अविनाभावः विद्यते।

शब्देन बोध्यमानः अर्थः (वस्तु वा, विषयः वा ) अपि सदा यां काम् अपि क्रियां वहति एव । क्रियां अनाश्रित्य अर्थः नाम वस्तु वा, विषयः वा अवस्थातुं न प्रभवति। अतः वस्तु-क्रिययोः सम्बन्धः अपि अविनाभावः एव अस्ति। वस्तु-क्रिययोः मध्ये अविनाभावतया स्थितः सः सम्बन्धः १.क्रिया- तद्व्यापाराश्रय सम्बन्धः, २.क्रिया-तत्फलाश्रयसम्बन्धः, ३.क्रिया-तत्साधनसम्बन्धः, ४.क्रिया-तन्निमित्तसम्बन्धः, ५.क्रिया- तदवधि-सम्बन्धः, ६.क्रिया-तदाश्रयसम्बन्धः, इति षोढा विभक्तः अस्ति। सम्बन्ध न केवलं वस्तु-क्रिययोः एव, परं द्वयोः वस्तुनोः च कश्चन भवति।

एवं वस्तु-क्रिययोः मध्ये षोढा **विभक्तं** इमं सम्बन्धम् , द्वयोः वस्तुनोः च मध्ये स्थितं सम्बन्धं च प्रत्ययाः द्योतयन्ति। वस्तु-क्रिययोः मध्ये वा ,द्वयोः वस्तुनोः च मध्ये वा विभक्तम् इमं सम्बन्धं द्योतयन्ति इति कारणतः एव , तत्तत्सम्बन्धद्योतकानां प्रत्ययानां व्याकरणे विभक्तिः इति व्यवहारः जातः। एवं एकैकस्य शब्दस्य सप्त विभक्तयः भवन्ति। एकैकस्याः विभक्तेः त्रीणि वचनानि च भवन्ति। सप्तसु विभक्तिषु वचनत्रये विद्यमानानां एकविंशतिरूपाणां एकत्र समीकरणं कृतम्। एवं सुलभतया सरलतया अवगाहनासम्पादकतया च व्यवस्थीकृता एषा रूपराशिः एव संस्कृतव्याकरणे शब्दाः इति नाम्ना ख्यातिम् आप्ता। अस्मिन् पाठ्यभागे एतेषां केषाञ्चन शब्दानां परिचयः सम्पाद्यते।

## I.1.लक्ष्याणि

संस्कृते वस्तु-क्रियासम्बन्धद्योतकाः पट्टिकारूपेण दीयमानाः शब्दाः प्रमुखं स्थानं वहन्ति। पट्टिकासु -सप्तसु विभक्तिषु , वचनत्रये ,स्थितानि शब्दानां रूपाणि अन्ते विद्यमानं वर्णं आधारीकृत्य कांश्चन विकारान् प्राप्नुवन्ति। तथा हि -शब्दाः अजन्ताः वा हलन्ताः वा भवन्ति। येषां शब्दानां अच् =अ.इ.उ.ऋ.ए.ओ.ऐ.औ.वर्णाः अन्ते भवन्ति ते अजन्तशब्दाः भवन्ति।येषां शब्दानां हल् =ह.य.व.र.ल.ञ.म.ङ.ण.न.झ.भ.घ.ढ.ध.ज.ब.ग.ड.द. ख.फ.छ.ठ.थ.च.ट.त.क.प.श.ष.स.ह.वर्णाः भवन्ति ते हलन्तशब्दाः भवन्ति। अजन्तत्वं हलन्तत्वं च शब्दानां रूपेषु विकारसम्पादनाय अन्यतमं कारणं भवति।

एवं लिङ्गं पुरस्कृत्य अपि शब्दरूपाणि अपरान् कांश्चन विकारान् प्राप्नुवन्ति। तथा हि ; संस्कृते स्थिताः शब्दाः सर्वे त्रिषु वर्गेषु समीकृताः भवन्ति। ते च वर्गाः १.पुंलिगशब्दाः २.स्त्रीलिंगशब्दाः ३.नपुंसकलिंगशब्दाः भवन्ति। तेषु पुंलिगशब्दाः कतिपयान् विकारान् आप्नुवन्ति। स्त्रीलिंगशब्दाः अपरान् कतिपयान् परिणामान् वहन्ति। नपुंसकलिंगशब्दाः अन्यादृशान् कतिपयान् विपरिणामान् प्राप्नुवन्ति। सप्तसु

विभक्तिषु , वचनत्रये शब्दानां रूपेषु विकारसम्पादने अजन्तत्वम्, हलन्तत्वम्, लिङ्गं च कीदृशान् विकारान् वहति इत्यंशं अत्र ज्ञातुं प्रभवामः। एतत् पाठायांशस्य अध्ययनेन -

* शब्दानाम् अन्तं निर्णेतुं प्रभवति।
*एकैकस्य शब्दस्य सप्त विभक्तयः भवन्ति इति बोद्धुं शक्नोति।
*एकैकस्याः विभक्तेः त्रीणि वचनानि भवन्ति इति अवगन्तुं पारयति।
*सप्तसु विभक्तिषु, वचनत्रये , अजन्तपुंलिगशब्दानां रूपाणि ज्ञातुं समर्थः भवति।
*सप्तसु विभक्तिषु, वचनत्रये , अजन्तस्त्रीलिगशब्दानां रूपाणि लिखितुं प्रभवति।
*सप्तसु विभक्तिषु, वचनत्रये , अजन्तनपुंसकलिगशब्दानां रूपाणि पठितुं शक्नोति।

## I.2.1.अजन्त(=अच् + अन्त)पुंलिङ्ग-साधारणशब्दाः।

### I.2.1.1.अजन्तेषु(=अच् + अन्त)अकारान्तः पुंलिङ्गः रामशब्दः।

अकारान्तः पुंलिङ्गः '**राम**' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| सम्बोधनप्रथमा | हे राम | हे रामौ | हे रामाः |
| द्वितीया | रामं | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |

**एवं** कृष्णः, गोविन्दः, मुकुन्दः, शिवः, निलयः, वृक्षः, **इत्यादयः**

### I.2.1.2.अजन्तेषु(=अच् + अन्त)इकारान्तः पुंलिङ्गः हरिशब्दः।

इकारान्तः पुंलिङ्गो '**हरि**' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| सम्बोधनप्रथमा | हे हरे | हे हरी | हे हरयः |
| द्वितीया | हरिं | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पंचमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |

**एवं** कविः, अग्निः, रविः, दाशरथिः, **इत्यादयः** ।

### I.2.1.3.अजन्तेषु(=अच् + अन्त)उकारान्तः पुंलिङ्गः शम्भुशब्दः।

उकारान्तः पुंलिङ्गो '**शम्भु**' शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | शम्भुः | शम्भू | शम्भवः |
| सम्बोधनप्रथमा | हे शम्भो | हे शम्भू | हे शम्भवः |
| द्वितीया | शम्भुम् | शम्भू | शम्भून् |

| | | | |
|---|---|---|---|
| तृतीया | शम्भुना | शम्भुभ्याम् | शम्भुभिः |
| चतुर्थी | शम्भुवे | शम्भुभ्याम् | शम्भुभ्यः |
| पञ्चमी | शम्भ्वोः | शम्भुभ्याम् | शम्भुभ्यः |
| षष्ठी | शम्भ्वोः | शम्भ्वोः | शम्भूनाम् |
| सप्तमी | शम्भौ | शम्भ्वोः | शम्भुषु |

**एवम्,** विष्णुः, गुरुः, भानुः, विधुः, **इत्यादयः।**

## I.2.1.4.अजन्तेषु(=अच् + अन्त)ऋकारान्तः पुंलिङ्गः धातृशब्दः।

ऋकारान्तः पुंलिङ्गो **'धातृ'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | धाता | धातारौ | धातारः |
| सम्बोधनप्रथमा | हे धातः | हे धातारौ | हे धातारः |
| द्वितीया | धातारम् | धातारौ | धातृन् |
| तृतीया | धात्रा | धातृभ्याम् | धातृभिः |
| चतुर्थी | धात्रे | धातृभ्याम् | धातृभ्यः |
| पञ्चमी | धातुः | धातृभ्याम् | धतृभ्यः |
| षष्ठी | धातुः | धात्रोः | धातृणाम् |
| सप्तमी | धातरि | धात्रोः | धातृषु |

**एवम्,** शास्ता, कर्ता, **इत्यादयः।**

## I.2.1.5.अजन्तेषु(=अच् + अन्त)ऋकारान्तः पुंलिङ्गः पितृशब्दः।

ऋकारान्तः पुंलिङ्गो **'पितृ'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| सम्बोधनप्रथमा | हे पितः | हे पितरौ | हे पितरः |
| द्वितीया | पितरम् | पितरौ | पितृन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितृणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |

**एवम्,** जामाता, भ्राता, **इत्यादयः।**

## I.2.1.6.अजन्तेषु(=अच् + अन्त)ओकारान्तः पुंलिङ्गः गोशब्दः

ओकारान्तः पुंलिङ्गः **गो** शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | गौः | गावौ | गावः |
| सम्बोधनप्रथमा | हे गौः | हे गावौ | हे गावः |
| द्वितीया | गां | गावौ | गाः |
| तृतीया | गवा | गोभ्याम् | गोभिः |
| चतुर्थी | गवे | गोभ्याम् | गोभ्यः |
| पञ्चमी | गोः | गोभ्याम् | गोभ्यः |

| | | | |
|---|---|---|---|
| षष्ठी | गोः | गवोः | गवाम् |
| सप्तमी | गवि | गावोः | गोषु |

**एवम्,** सुद्यौः, स्मृत्यौः, **इत्यादयः**

## I.2.2.अजन्त(=अच् + अन्त)स्त्रीलिङ्ग-साधारणशब्दाः।

### I.2.2.1.अजन्तेषु(=अच्+ अन्त)आकारान्तः स्त्रीलिङ्गः रमाशब्दः।

आकारान्तःस्त्रीलिंङ्गो **'रमा'** शब्दः ।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |
| सम्बोधनप्रथमा | हे रमे | हे रमे | हे रमाः |
| द्वितीया | रमाम् | रमे | रमाः |
| तृतीया | रमया | रमाभ्याम् | रमाभिः |
| चतुर्थी | रमायै | रमाभ्याम् | रमाभ्यः |
| पञ्चमी | रमायाः | रमाभ्याम् | रमाभ्यः |
| षष्ठी | रमायाः | रमयोः | रमाणाम् |
| सप्तमी | रमायाम् | रमयोः | रमासु |

**एवम्,** सीता, भामा, **इत्यादयः।**

### I.2.2.2.अजन्तेषु(=अच् + अन्त)इकारान्तः स्त्रीलिङ्गः मतिशब्दः।

इकारान्तः स्त्रीलिंगः **'मति'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| सम्बोधनप्रथमा | हे मते | हे मती | हे मतयः |
| द्वितीया | मति | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै,मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः,मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः,मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्, मतौ | मत्योः | मतिषु |

**एवं रुचिः, घृणिः इत्यादयः**

### I.2.2.3.अजन्तेषु(=अच् + अन्त)ईकारान्तः स्त्रीलिङ्गः गौरीशब्दः।

ईकारान्तः स्त्रीलिङ्गो **'गौरी'** शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | गौरी | गौयौ | गौर्यः |
| सम्बोधनप्रथमा | हे गौरि | हे गौर्यो | हे गौर्यः |
| द्वितीया | गौरीं | गौर्यो | गोरीः |
| तृतीया | गौर्या | गोरीभ्याम् | गौरीभिः |
| चतुर्थी | कौर्यो | गौरीभ्याम् | गौरीभ्यः |
| पञ्चमी | गौर्याः | गौरीभ्याम् | गौरीभ्यः |
| षष्ठी | गौर्याः | गौर्योः | गौरीणाम् |
| सप्तमी | गौर्याम् | गौर्योः | गोरीषु |

**एवं वाणी, नदी, इत्यादयः**

## I.2.2.4.अजन्तेषु(=अच् + अन्त)उकारान्तः स्त्रीलिङ्गः धेनुशब्दः।

उकारान्तः स्त्रीलिंगः **'धेनु'** शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | धेनुः | धेनू | धेनवः |
| सम्बोधनप्रथमा | हे धेनो | हे धेनू | हे धेनवः |
| द्वितीया | धेनुं | धेनू | धेनूः |
| तृतीया | धेन्वा | धेनुभ्याम् | धेनुभिः |
| चतुर्थी | धेन्वै,धेनवे | धेनुभ्याम् | धेनुभ्यः |
| पञ्चमी | धेन्वाः,धेनोः | धेनुभ्याम् | धेनुभ्यः |
| षष्ठी | धेन्वाः,धेनोः | धेन्वोः | धेनूनाम् |
| सप्तमी | धेन्वाम्, धेनौ | धेन्वोः | धेनुषु |

**एवं तनुः,इषुः,पटुः,इत्यादयः**

## I.2.2.5.अजन्तेषु(=अच्+अन्त)ऊकारान्तः स्त्रीलिङ्गः वधूशब्दः।

ऊकारान्तः स्त्रीलिंगो **'वधू'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | वधूः | वध्वौ | वध्वः |
| सम्बोधनप्रथमा | हे वधु | हे वध्वौ | हे वध्वः |
| द्वितीया | वधूम् | वध्वौ | वधूः |
| तृतीया | वध्वा | वधूभ्याम् | वधूभिः |
| चतुर्थी | वध्वै | वधूभ्याम् | वधूभ्यः |
| पञ्चमी | वध्वाः | वधूभ्याम् | वधूभ्यः |
| षष्ठी | वध्वाः | वध्वोः | वधूनाम् |
| सप्तमी | वध्वाम् | वध्वोः | वधूषु |

**एवम्,** तनूः, चमूः, **इत्यादयः**

## I.2.2.6.अजन्तेषु(=अच्+ अन्त)ऋकारान्तः स्त्रीलिङ्गः मातृशब्दः

ऋकारान्तः स्त्रीलिंगो **'मातृ'** शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | माता | मातरौ | मातरः |
| सम्बोधनप्रथमा | हे मातः | हे मातरौ | हे मातरः |
| द्वितीया | मातरं | मातरौ | मातॄः |
| तृतीया | मात्रा | मातृभ्याम् | मातृभिः |
| चतुर्थी | मात्रे | मातृभ्याम् | मातृभ्यः |
| पञ्चमी | मातुः | मातृभ्याम् | मातृभ्यः |
| षष्ठी | मातुः | मात्रोः | मातॄणाम् |
| सप्तमी | मातरि | मात्रोः | मातृषु |

**एवम्,** याता, ननान्दा, दुहिता, **इत्यादयः**

## I.2.3.अजन्तनपुंसकलिङ्गसाधारणशब्दाः

### I.2.3.1.अजन्तेषु(=अच्+अन्त)अकारान्तः नपुंसकलिङ्गः ज्ञानशब्दः।

अकारान्तः नपुंसकलिङ्गः **'ज्ञान'** शब्दः ।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | ज्ञानम् | ज्ञाने | ज्ञानानि |
| सम्बोधनप्रथमा | हे ज्ञान | हे ज्ञाने | हे ज्ञानानि |
| द्वितीया | ज्ञानम् | ज्ञाने | ज्ञानानि |
| तृतीया | ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः |
| चतुर्थी | ज्ञानाय | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| पञ्चमी | ज्ञानात् | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| षष्ठी | ज्ञानस्य | ज्ञानयोः | ज्ञानानाम् |
| सप्तमी | ज्ञाने | ज्ञानयोः | ज्ञानेषु |

**एवम्,** धनम्, वनम्, फलम्, **इत्यादयः।**

### I.2.3.2.अजन्तेषु(=अच्+अन्त)इकारान्तः नपुंसकलिङ्गः वारिशब्दः।

इकारान्तः नपुंसकलिङ्गो **'वारि'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| सम्बोधनप्रथमा | हे वारे,हे वारि | हे वारिणी | हे वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्याम् | वारिभिः |
| चतर्थी | वारिणे | वारिभ्याम् | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |

**एवम्,** कराघ्रि, पादपाणि, हरहरि, **इत्यादयः ।**

### I.2.3.3.अजन्त(=अच् + अन्त)इकारान्तः नपुंसकलिङ्गः शुचिशब्दः।

इकारान्तः नपुंसकलिङ्गो **'शुचि'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | शुचि | शुचिनी | शुचीनि |
| सम्बोधनप्रथमा | हे शुचे,हे शुचि | हे शुचिनी | हे शुचीनि |
| द्वितीया | शुचि | शुचिनी | शुचीनि |
| तृतीया | शुचिना | शुचिभ्याम् | शुचिभिः |
| चतुर्थी | शुचिने,शुचये | शुचिभ्याम् | शुचिभ्यः |
| पञ्चमी | शुचिनः,शुचेः | शुचिभ्याम् | शुचिभ्यः |
| षष्ठी | शुचिनः,शुचेः | शुचिनोः,शुच्योः | शुचीनाम् |
| सप्तमी | शुचिनि,शुचौ | शुचिनः,शुच्योः | शुचिषु |

**एवम्,** शिवताति, नीलरुचि, **इत्यादयः ।**

## I.2.3.4.अजन्त(=अच्+अन्त)उकारान्तः नपुंसकलिङ्गः मधुशब्दः।

उकारान्तः नपुंसकलिङ्गः **'मधु'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| सम्बोधनप्रथमा | हे मधो,हेमधु | हे मधुनी | हे मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्याम् | मधुभिः |
| चतुर्थी | मधुने | मधुभ्याम् | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्याम् | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु |

**एवम्,** अम्बु, जत्रु, श्मश्रु, **इत्यादयः।**

## I.2.3.5.अजन्त(=अच् + अन्त)उकारान्तः नपुंसकलिङ्गः मृदुशब्दः।

उकारान्तः नपुंसकलिङ्गः **'मृदु'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | मृदु | मृदुनी | मृदूनि |
| सम्बोधनप्रथमा | हे मृदो,हे मृदु | हे मृदुनी | हे मृदूनि |
| द्वितीया | मृदु | मृदूनी | मृदूनि |
| तृतीया | मृदुना | मृदुभ्याम् | मृदुभिः |
| चतुर्थी | मृदुने,मृदवे | मृदुभ्याम् | मृदुभ्यः |
| पञ्चमी | मृदुनः,मृदोः | मृदुभ्याम् | मृदुभ्यः |
| षष्ठी | मृदुनः,मृदोः | मृदुनोः,मृद्वोः | मृदूनाम् |
| सप्तमी | मृदुनि,मृदोः | मृदुनोः,मृद्वोः | मृदुषु |

**एवम्,** पटु, हृदयालु ,**इत्यादयः**

## I.2.3.6.अजन्त(=अच् +अन्त)ऋकारान्तः नपुंसकलिङ्गः कर्तृशब्दः।

ऋकारान्तः नपुंसकलिङ्गः **'कर्तृ'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | कर्तृ | कर्तृणी | कर्तृणि |
| सम्बोधनप्रथमा | हे कर्तः,हे कर्तृ | हे कर्तृणी | हे कर्तृणि |
| द्वितीया | कर्तृ | कर्तृणी | कर्तृणी |
| तृतीया | कर्तृणा,कर्त्रा | कर्तृभ्यां | कर्तृभिः |
| चतुर्थी | कर्तृणे,कर्त्रे | कर्तृभ्यां | कर्तृभ्यः |
| पञ्चमी | कर्तृणः,कर्तुः | कर्तृभ्यां | कर्तृभ्यः |
| षष्ठी | कर्तृणः,कर्तुः | कर्तृणोः,कर्त्रोः | कर्तृणाम् |
| सप्तमी | कर्तृणि,कर्तरि | कर्तृणोः,कर्त्रोः | कर्तृषु |

**एवम्,** भोक्तृ, गन्तृ, हन्तृ, **इत्यादयः ।**

## I.3.उपसंहारः

एवम् अस्मिन् पाठ्यांशे , अजन्तानाम्, नाम अकारान्त-इकारान्त-उकारान्त-ऋकारान्त-ओकारान्त-शब्दानां ,त्रिषु लिङ्गेषु, सप्तसु विभक्तिषु, त्रिषु वचनेषु च विकारान् जानान्ति। शब्दरूपाणां स्वरूपं च जानान्ति । एवम् अत्र प्रदर्शितेभ्यः इतरेषाम् अजन्तपुंलिंगानां कृष्ण-मुकुन्द-इत्यादि अकारान्तशब्दानाम्, कवि-रवि इत्यादि इकारान्तशब्दानाम्, विधु-विष्णु इत्यादि उकारान्तशब्दानाम्, शास्तृ,कर्तृइत्यादि ऋकारान्तशब्दानां च रूपाणि जानाति। तत्तदन्तानां शब्दानां रूपेषु साम्यं वैषम्यं च अवगन्तुं पारयन्ति।

## I.4.अभ्यासः

अ). रामशब्दवत् कृष्ण,मुकुन्द, शिव, निलय ,वृक्ष शब्दानां रूपाणि लिखत ?

इ). हरिशब्दवत् कवि-रवि-दाशरथिशब्दानां रूपाणि लिखत ?

उ). गौरीशब्दवत् वाणी,नदी,शब्दयोः रूपाणि लिखत ?

ऋ). वधूशब्दवत् तनू-चमू-शब्दयोः रूपाणि लिखत ?

ए). ज्ञानशब्दवत् धन-वन-फल-शब्दानां रूपाणि लिखत ?

ओ).शुचिशब्दवत् शिवताति,नीलरुचि,शब्दयोः रूपाणि लिखत ?

# UNIT; II : सर्वनामशब्दाः

**II.0. परिचयः**
**II.1. लक्ष्याणि**
**II.2. सर्वनामशब्दाः**
- **II.2.1.'सर्व'** शब्दः
- **II.2.2.'तद्'** शब्दः
- **II.2.3. 'कतर'** शब्दः
- **II.2.4.'यद्'** यच्छब्दः
- **II.2.5.'एतद्' शब्दः**
- **II.2.6.'किम्'** शब्दः
- **II.2.7.इदम्** शब्दः।
- **II.2.8.'अदस्'** शब्दः
- **II.2.9.'युष्मद्'** शब्दः
- **II.2.10. 'अस्मद्'** शब्दः
- **II.2.11.** अकारान्तपुंलिङ्गाः केचन सर्वनामशब्दाः
- **II.2.12. ' उभय '** शब्दः (द्विवचनरहितः)
- **II.2.13. ' भवत् '** शब्दः

**II.3. उपसंहारः**
**II.4. अभ्यासः**

## II.0. परिचयः

प्रतिभाषायां सर्वनामशब्दाः वर्तन्ते। एते शब्दाः प्रथमं कीर्तितस्य नामवाचकस्य परामर्शकाः भवन्ति। वाक्येषु नामवाचकस्य पुनः पुनः आवृत्तिं वारयन्ति। वाक्यप्रयोगेषु लाघवम् आर्जयन्ति। एतेषु अपि अजन्ताः हलन्ताः च शब्दाः वर्तन्ते। तेषां रूपाणि साधारणशब्देभ्यः विलक्षणतया विद्यन्ते। युष्मद्- अस्मद् इति शब्दद्वयं विहाय , एते त्रिषु लिङ्गेषु भिन्नभिन्नान्येव रूपाणि वहन्ति। सर्वनामशब्दानां रूपाणि कथं भिन्नानि भवन्ति, कियन्ति वा विलक्षणानि भवन्ति इत्यंशः अस्मिन् पाठ्यांशे अवगन्तुं शक्यते। प्रधानतया अत्र, सर्वनामशब्दानाम्= त्रिषु लिङ्गेषु सप्तसु विभक्तिषु वचनत्रये स्थितानां रूपाणां, स्वरूपस्य परिचयः अत्र लभ्यते।

## II.1. लक्ष्याणि

सर्वनामशब्दाः प्राचुर्येण अजन्ताः भवन्ति। तत्रापि अकारन्ताः अधिकतया, इकारान्तास्तु अत्यल्पतया च विद्यन्ते। हलन्ताः अपि केचन विद्यन्ते। एषु केचन पुषान् परामृशन्ति,ते पुंलिगशब्दाः भवन्ति। केचन स्त्रियः परामृशन्ति,ते स्त्रीलिगशब्दाः भवन्ति। केचन देशं परामृशन्ति। अपरे केचन कालं परामृशन्ति। तत्रापि केचन देशगतं कालगतं .दूरं परामृशन्ति। अन्ये केचन देशगतं कालगतं .सामीप्यं परामृशन्ति। सामान्यतः देशगतं कालगतं, दूरं सामीप्यं च बोधयन्तः सर्वनामशब्दाः अव्ययानि भवन्ति।एते नपुंसकलिङ्गशब्दाः भवन्ति। विकारान् पदे पदे न प्राप्नुवन्ति। पुरुषपरामर्शकाः स्त्रीपरामर्शकाः च सर्वनामशब्दाः अनेकान् विकारान् वहन्ति। नपुंसकलिंगशब्दास्तु प्रथम-द्वितीयविभक्ती विहाय, अवशिष्टासु विभक्तिषु , पुंलिगरूपाणि एव भजन्ते।

## II.2. सर्वनामशब्दाः

एते सर्वान् पराम्रष्टुं योग्याः शब्दाः भवन्ति। सर्वेषां नामामि सर्वनामानि, नाम सर्वान् पराम्रष्टुम् अर्हाणि नामानि सर्वनामानि इत्यर्थः।सर्व, विश्व, डतर, डतम, कतर, कतम, यतर, यतम, ततर, ततम, एकतर, एकतम, अन्य, अन्यतर, इतर, त्व, सम, सिम, नेम, पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, स्व, अधर, अन्तर, एक, उभ, उभय, द्वि, त्वत्, भवत्, तद्, त्यद्, यद्, एतद्, युष्मद्, अस्मद्, किम्, इदम्, अदस्, एते सर्वनामशब्दाः भवन्ति।

### II.2.1.'**सर्व**' शब्दः

#### II.2.1.1.पुंलिङ्गः '**सर्व**' शब्दः

अकारान्तः पुलिंगः '**सर्व**' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | सर्वः | सर्वौ | सर्वे |
| सम्बोधनप्रथमा | हे सर्व | हे सर्वौ | हे सर्वे |
| द्वितीया | सर्वम् | सर्वौ | सर्वान् |
| तृतीया | सर्वेण | सर्वाभ्याम् | सर्वैः |
| चतुर्थी | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| पञ्चमी | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| षष्ठी | सर्वस्य | सर्वयोः | सर्वेषाम् |
| सप्तमी | सर्वस्मिन् | सर्वयोः | सर्वेषु |

**एवम्, विश्वादि-सिम-शब्दपर्यन्तानां एकशब्दस्य च रूपाणि**

#### II.2.1.2.स्त्रीलिङ्गः '**सर्व** शब्दः

आकारान्तः स्त्रीलिङ्गः '**सर्वा**' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | सर्वा | सर्वे | सर्वाः |
| सम्बोधनप्रथमा | हे सर्वे | हे सर्वे | हे सर्वाः |
| द्वितीया | सर्वाम् | सर्वे | सर्वाः |
| तृतीया | सर्वया | सर्वाभ्याम् | सर्वाभिः |
| चतुर्थी | सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| पञ्चमी | सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |
| षष्ठी | सर्वस्याः | सर्वयोः | सर्वासाम् |
| सप्तमी | सर्वस्याम् | सर्वयोः | सर्वासु |

**एवम्, विश्व**शब्दप्रभृति **उभय**शब्दपर्यन्तानां रूपाणि ।

#### II.2.1.3.नपुंसकलिंगः '**सर्व**' शब्दः

अकारान्तः नपुंसकलिंगः '**सर्व**' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | सर्वम् | सर्वे | सर्वाणि |
| सम्बोधनप्रथमा | हे सर्व | हे सर्वे | हे सर्वाणि |
| द्वितीया | सर्वम् | सर्वे | सर्वाणि |
| तृतीया | सर्वेण | सर्वाभ्याम् | सर्वैः |

| | | | |
|---|---|---|---|
| चतुर्थी | सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| पञ्चमी | सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः |
| षष्ठी | सर्वस्य | सर्वयोः | सर्वेषाम् |
| सप्तमी | सर्वस्मिन् | सर्वयोः | सर्वेषु |

**एवम्,** विश्वशब्दस्य, एकतरशब्दस्य, त्वत्-शब्दादारभ्य उभयशब्दपर्यन्तानां **च रूपाणि।**

## II.2.2.'**तद्**' शब्दः

### II.2.2.1.पुंलिंगः '**तद्**' शब्दः

**दकारान्तः पुंलिंगः 'तद्' शब्दः।**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | सः | तौ | तान् |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

**एवम्** स्यः, स्त्यौ, स्त्ये- स्त्यम्, स्त्यौ,स्त्यान् **इत्यादि तद् शब्दवत्।**

### II.2.2.2.स्त्रीलिंगः '**तद्**' **शब्दः**

**दकारान्तः स्त्रीलिंगः 'तद्' शब्दः ।**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

**अवधेयम्**-तद्,यद्,एतद्,युष्मद्,अस्मद्,इदम्,अदस् शब्दानां सम्बोधनप्रथमाविभक्तिः न भवति इति।

### II.2.2.3.नपुंसकलिंगः '**तद्**' शब्दः

**दकारान्तनपुंसकलिंगः 'तद्' शब्दः**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## II.2.3. **'कतर'** शब्दः

अकारान्तनपुंसकलिङ्गः **'कतर'** शब्दः ।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | कतरत् | कतरे | कतराणि |
| द्वितीया | कतरत् | कतरे | कतराणि |
| तृतीया | कतरेण | कतराभ्याम् | कतरैः |
| चतुर्थी | कतरस्मै | कतराभ्याम् | कतरेभ्यः |
| पञ्चमी | कतरस्मात् | कतराभ्याम् | कतरेभ्यः |
| षष्ठी | कतरस्य | कतरयोः | कतराणाम् |
| सप्तमी | कतरस्मिन् | कतरयोः | कतरेषु |

**एवम्,** कतम-यतर-यतम-ततर-ततम-एकतम-अन्य-अन्यतर-इतर-शब्दानां रूपाणि भवन्ति।

## II.2.4.'**यद्**' यच्छब्दः

### II.2.4.1.पुंलिंगः'**यद्**' यच्छब्दः

दकारान्तः पुंलिंगो **'यद्'** यच्छब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | यः | यौ | ये |
| द्वितीया | यम् | यौ | यान् |
| तृतीया | येन | याभ्याम् | यैः |
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु |

### II.2.4.2.स्त्रीलिंगो **'यद्' शब्दः**

**दकारान्तः स्त्रीलिंगो 'यद्' शब्दः।**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | या | ये | याः |
| द्वितीया | याम् | ये | याः |
| तृतीया | यया | याभ्याम् | याभिः |
| चतुर्थी | यस्यै | याभ्याम् | याभ्यः |
| पञ्चमी | यस्याः | याभ्याम् | याभ्यः |
| षष्ठी | यस्याः | ययोः | यासाम् |
| सप्तमी | यस्याम् | ययोः | यासु |

### II.2.4.3.नपुंसकलिङ्गः **'यद्'** शब्दः

दकारान्दः नपुंसकलिङ्गः **'यद्'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | यत् | ये | यानि |
| द्वितीया | यत् | ये | यानि |
| तृतीया | येन | याभ्याम् | यैः |

| | | | |
|---|---|---|---|
| चतुर्थी | यस्मै | याभ्याम् | येभ्यः |
| पञ्चमी | यस्मात् | याभ्याम् | येभ्यः |
| षष्ठी | यस्य | ययोः | येषाम् |
| सप्तमी | यस्मिन् | ययोः | येषु |

## II.2.5.'एतद्' शब्दः

### II.2.5.1.पुंलिङ्गो 'एतद्' शब्दः

**दकारान्तः पुंलिङ्गो 'एतद्' शब्दः**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | एषः | एतौ | एते |
| द्वितीया | एतम्,एनम् | एतौ,एनौ | एतान्,एनान् |
| तृतीया | एतेन, एनेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः,एनयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः,एनयोः | एतेषु |

### II.2.5.2.स्त्रीलिङ्गः 'एतद्' शब्दः

**दकारान्तः स्त्रीलिङ्गः 'एतद्' शब्दः ।**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | एषा | एते | एताः |
| द्वितीया | एताम्, एनाम् | एते,एने | एताः, एनाः |
| तृतीया | एतया,एनया | एताभ्याम् | एताभिः |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्यः |
| पञ्चमी | एतस्याः | एतभ्याम् | एताभ्यः |
| षष्ठी | एतस्याः | एतयोः,एनयोः | एतासाम् |
| सप्तमी | एतस्याम् | एतयोः,एनयोः | एतासु |

### II.2.5.3.नपुंसकलिङ्गः 'एतद्' शब्दः

दकारान्तः नपुंसकलिङ्गः **'एतद्'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत्,एनत्, | एते,एने | एतानि,एनानि |
| तृतीया | एतेन, एनेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः,एनयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः,एनयोः | एतेषु |

## II.2.6.**'किम्'** शब्दः

### II.2.6.1.पुंलिंगः **'किम्'** शब्दः

मकारान्तः पुंलिंगः **'किम्'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

### II.2.6.2.स्त्रीलिङ्गः **किम्** शब्दः

मकारान्तः स्त्रीलिङ्गः **किम्** शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

### II.2.6.3.नपुंसकलिङ्गः **किम्** शब्दः।

मकारान्तः नपुंसकलिङ्गः **किम्** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

## II.2.7.**इदम्** शब्दः।

### II. 2.7.1.मकारान्तः पुंलिङ्गः **इदम्** शब्दः।

मकारान्तः पुंलिङ्गः **इदम्** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | अयम् | इमौ | इमे |
| द्वितीया | इमम्, एनम् | इमौ,एनौ | इमान्,एनान् |
| तृतीया | अनेन, एनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः,एनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः,एनयोः | एषु |

### II.2.7.2. स्त्रीलिङ्गः **इदम्** शब्दः

मकारान्तः स्त्रीलिङ्गः **इदम्** शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| इयम् | इमे | | इमाः |
| इमाम्,एनाम् | इमे,एने | | इमाः, एनाः |
| अनया,एनया | आभ्याम् | | आभिः |
| अस्यै | आभ्याम् | | आभ्यः |
| अस्याः | आभ्याम् | | आभ्यः |
| अस्याः | अनयोः,एनयोः | | आसाम् |
| अस्याम् | अनयोः,एनयोः | | आसु |

### II.2.7.3.नपुंसकलिङ्गः **इदम्** शब्दः ।

मकारान्तः नपुंसकलिङ्गः **इदम्** शब्दः ।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | इदम्,एनत् | इमे,एने | इमानि,एनानि |
| तृतीया | अनेन, एनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः,एनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः,एनयोः | एषु |

## II.2.8.'**अदस्**' शब्दः

### II.2.8.1. पुंलिंगः '**अदस्**' शब्दः

सकारान्तः पुंलिंगः '**अदस्**' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | असौ | अमू | अमी |
| द्वितीया | अमुम् | अमू | अमून् |
| तृतीया | अमुना | अमूभ्याम् | अमीभिः |

| | | | |
|---|---|---|---|
| चतुर्थी | अमुष्मै | अमूभ्याम् | अमीभ्यः |
| पञ्चमी | अमुष्मात् | अमूभ्याम् | अमीभ्यः |
| षष्ठी | अमुष्य | अमुयोः | अमीषाम् |
| सप्तमी | अमुष्मिन् | अमुयोः | अमीषु |

### II.2.8.2. स्त्रीलिङ्गः **'अदस्'** शब्दः।

सकारान्तः स्त्रीलिङ्गः **'अदस्'** शब्दः।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | असौ | अमू | अमूः |
| द्वितीया | अमूम् | अमू | अमूः |
| तृतीया | अमुया | अमूभ्याम् | अमूभिः |
| चतुर्थी | अमुष्यै | अमुभ्याम् | अमूभ्यः |
| पञ्चमी | अमुष्याः | अमूभ्याम् | अमूभ्यः |
| षष्ठी | अमुष्याः | अमुयोः | अमूषाम् |
| सप्तमी | अमूष्याम् | अमुयोः | अमूषु |

### II.2.8.3. नपुंसकलिङ्गः **'अदस्'** शब्दः ।

सकारान्तः नपुंसकलिङ्गः **'अदस्'** शब्दः ।

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | अदः | अमू | अमूनि |
| द्वितीया | अदः | अमू | अमूनि |
| तृतीया | अमुना | अमूभ्याम् | अमीभिः |
| चतुर्थी | अमुष्मै | अमूभ्याम् | अमीभ्यः |
| पञ्चमी | अमुष्मात् | अमूभ्याम् | अमीभ्यः |
| षष्ठी | अमुष्य | अमुयोः | अमीषाम् |
| सप्तमी | अमुष्मिन् | अमुयोः | अमीषु |

### II.2.9.**'युष्मद्'** शब्दः

दकारान्तः त्रिषु लिङ्गेषु सरूपः **'युष्मद्'** शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | त्वं | युवाम् | यूयम् |
| द्वितीया | त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव, ते | युवयोः, वाम् | युष्माकम्, वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

## II.2.10. 'अस्मद्' शब्दः

दकारान्तः त्रिषु लिङ्गेषु सरूपः **'अस्मद्'** शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्, मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः, नौ | अस्माकम्, नः |
| सप्तमी | मयि | आवयोः | आस्मासु |

## II.2.11. अकारान्तपुंलिङ्गाः केचन सर्वनामशब्दाः

### II.2.11.1. 'नेम' शब्दः

अकारान्तः पुंलिङ्गः **'नेम'** शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | नेमः | नेमौ | नेमे, नेमाः |
| सं.प्रथमा | हे नेम | हे नेमौ | हे नेमे, हो नेमाः |
| द्वितीया | नेमम् | नेमौ | नेमान् |
| तृतीया | नेमेन | नेमाभ्याम् | नेमैः |
| चतुर्थी | नेमस्मै | नेमाभ्याम् | नेमेभ्यः |
| पञ्चमी | नेमस्मात् | नेमाभ्याम् | नेमेभ्यः |
| षष्ठी | नेमस्य | नेमयोः | नेमेषाम् |
| सप्तमी | नेमस्मिन् | नेमयोः | नेमेषु |

### II.2. 11.2. ' पूर्व ' शब्दः

अकारान्तः पुंलिङ्गः **' पूर्व '** शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | पूर्वः | पूर्वौ | पूर्वे, पूर्वाः |
| सं.प्रथमा | हे पूर्व | हे पूर्वौ | हे पूर्वे, हे पूर्वाः |
| द्वितीया | पूर्वम् | पूर्वौ | पूर्वान् |
| तृतीया | पूर्वेण | पूर्वाभ्याम् | पूर्वैः |
| चतुर्थी | पूर्वस्मै | पूर्वाभ्याम् | पूर्वेभ्यः |
| पञ्चमी | पूर्वस्मात्,पूर्वात् | पूर्वाभ्याम् | पूर्वेभ्यः |
| षष्ठी | पूर्वस्य | पूर्वयोः | पूर्वेषाम् |
| सप्तमी | पूर्वस्मिन्, पूर्वे | पूर्वयोः | पूर्वेषु |

**एवम्**, प्रथम-अवर-दक्षिण-उत्तर-अपर-अधर-त्व-अन्तर-शब्दानां रूपाणि ज्ञेयानि।

## II.2.11.3.' **उभ** ' शब्दः। (नित्यद्विवचनान्तः)

## II.2.11.3.1.पुंलिंगः' **उभ** ' शब्दः। (नित्यद्विवचनान्तः)

अकारान्तः पुंलिङ्गः ' **उभ** ' शब्दः। (नित्यद्विवचनान्तः)

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | …….. | उभौ | …….. |
| द्वितीया | …….. | उभौ | ……. |
| तृतीया | …….. | उभाभ्याम् | ……. |
| चतुर्थी | …….. | उभाभ्याम् | ……. |
| पञ्चमी | ……. | उभाभ्याम् | ……. |
| षष्ठी | ……. | उभयोः | ……. |
| सप्तमी | ……. | उभयोः | ……. |

## II.2. 11.3. 2.स्त्रीलिङ्गः' **उभा** ' शब्दः। (नित्यद्विवचनान्तः)

आकारान्तः स्त्रीलिङ्गः ' **उभा** ' शब्दः। (नित्यद्विवचनान्तः)

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | …….. | उभे | …….. |
| द्वितीया | …….. | उभे | ……. |
| तृतीया | …….. | उभाभ्याम् | ……. |
| चतुर्थी | …….. | उभाभ्याम् | ……. |
| पञ्चमी | ……. | उभाभ्याम् | ……. |
| षष्ठी | ……. | उभयोः | ……. |
| सप्तमी | ……. | उभयोः | ……. |

## II.2. 11.3.3. नपुंसकलिङ्गः ' **उभ** ' शब्दः। (नित्यद्विवचनान्तः)

अकारान्तः नपुंसकलिङ्गः ' **उभ** ' शब्दः। (नित्यद्विवचनान्तः)

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुचवनम्** |
|---|---|---|---|
| प्रथमा | …….. | उभे | …….. |
| द्वितीया | …….. | उभे | ……. |
| तृतीया | …….. | उभाभ्याम् | ……. |
| चतुर्थी | …….. | उभाभ्याम् | ……. |
| पञ्चमी | ……. | उभाभ्याम् | ……. |
| षष्ठी | ……. | उभयोः | ……. |
| सप्तमी | ……. | उभयोः | …… |

## II.2.12. ' **उभय** ' शब्दः (द्विवचनरहितः)

अकारान्तः पुंलिंगः ' **उभय** ' शब्दः (द्विवचनरहितः)

| **विभक्तयः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | उभयः | ....... | उभये |
| द्वितीया | हे उभय | ....... | हे उभये |
| तृतीया | उभयम् | ....... | उभयान् |
| चतुर्थी | उभयेन | ....... | उभयैः |
| पञ्चमी | उभयस्मै | ....... | उभयेभ्यः |
| षष्ठी | उभयस्मात् | ....... | उभयेषाम् |
| सप्तमी | उभयस्मिन् | ....... | उभयेषु |

## II.2.13. ' **भवत्** ' शब्दः

### II.2.13.1. तकारान्तः पुंलिंगः ' **भवत्** ' शब्दः

तकारान्तः पुंलिंगः ' **भवत्** ' शब्दः

| **विभक्तयः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | भवान् | भवन्तौ | भवन्तः |
| सं.प्रथमा | हे भवन् | हे भवन्तौ | हे भवन्तः |
| द्वितीया | भवन्तम् | भवन्तौ | भवतः |
| तृतीया | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी | भवते | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी | भवतः | भवद्भ्याम् | भवद्भ्यः |
| षष्ठी | भवतः | भवतोः | भवताम् |
| सप्तमी | भवति | भवतोः | भवत्सु |

### II.2.13.2. ईकारान्तः स्त्रीलिङ्गः ' **भवती** ' शब्दः

ईकारान्तः स्त्रीलिङ्गः ' **भवती** ' शब्दः

| **विभक्तयः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | भवती | भवत्यौ | भवत्यः |
| सं.प्रथमा | हे भवति | हे भवत्यौ | हे भवत्यः |
| द्वितीया | भवतीम् | भवत्यौ | भवतीः |
| तृतीया | भवत्या | भवतीभ्याम् | भवतीभिः |
| चतुर्थी | भवत्यै | भवतीभ्याम् | भवतीभ्यः |
| पञ्चमी | भवत्याः | भवतीभ्याम् | भवतीभ्यः |
| षष्ठी | भवत्याः | भवत्योः | भवतीनाम् |
| सप्तमी | भवत्याम् | भवत्योः | भवतीषु |

## II.3. उपसंहारः

एवम् , अत्र कतिपयानां सर्वनामशब्दानां रूपाणि प्रदर्शितानि। प्रमुखानां तद्, यद्, एतद्, किम्, इदम् , अदस् शब्दानां रूपाणि त्रिषु लिङ्गेषु, सप्तसु विभक्तिषु निरूपितानि। उभ-उभयशब्दयोः रूपाणि,निर्दिष्टानि। भवत् शब्दस्य पुंलिङ्गे स्त्रीलिङ्गे च रूपाणि च निरूपितानि।

## II.4. अभ्यासः

1.सर्वनामशब्दानां पुंलिङ्गरूपेषु साम्यं वैषम्यं च लिखत ?

2.सर्वनामशब्दानां नपुंसकलिङ्गरूपेषु साम्यं वैषम्यं च लिखत ?

# III;UNIT: संख्यावाचकशब्दाः


III.0.परिचयः

III.1.लक्ष्याणि

III.2.संख्यावाचकशब्दाः

III.2.1. 'एक' शब्दः (नित्यैकवचनान्तः)

III.2.1.1.अकारान्तः पुंलिङ्गः 'एक' शब्दः (नित्यैकवचनान्तः)

III.2.1.2.आकारान्तः स्त्रीलिङ्गः 'एका' शब्दः (नित्यैकवचनान्तः)

III.2.1.3.अकारान्तः नपुंसकलिङ्गः 'एक' शब्दः (नित्यैकवचनान्तः)

III.2.2. 'द्वि' शब्दः (नित्य द्विवचनान्तः)

III.2.2.1.इकारान्तः पुंलिङ्गः 'द्वि' शब्दः (नित्यद्विवचनान्तः)

III.2.2.2.इकारान्तः स्त्रीलिङ्गः 'द्वि' शब्दः (नित्यद्विवचनान्तः)

III.2.2.3.इकारान्तः नपुंसकलिङ्गः 'द्वि' शब्दः (नित्यद्विवचनान्तः)

III.3.उपसंहारः

III.4.अभ्यासः


## III.0.परिचयः

प्रतिभाषायां बहुविधानि पदानि भवन्ति। तानि कदाचित् नामवाचकानि भवन्ति। कदाचित् क्रियावाचकानि भवन्ति। कदाचित् कानिचित् पदानि बन्धुत्वं ख्यापयन्ति। कानिचित् सङ्ख्यां बोधयन्ति, कानिचित् प्रत्येकशः समुदायं कथयन्ति। कानिचित् देशम्, कानिचित् कालं च बोधयन्ति। एवं स्थिते वस्तुगतां सङ्ख्यां ये बोधयन्ति ते एव सङ्ख्यावाचकाः शब्दाः इति उच्यन्ते। सङ्ख्यावाचकशब्दानां प्रतिभाषायां प्रामुख्यम् वर्तते एव। एकैकस्य सङ्ख्यावाचकस्य कृते एकैकः स्वभावः विद्यते। सः च स्वभावः शास्त्रकारैः तत्र तत्र निरूपितः अस्ति । परम् अस्माभिः सङ्ख्यायाः स्वभावम् अनवगत्य एव , स्थूलतः अवगमनाय सङ्ख्यावाचकानां प्रयोगः क्रियते। अत्र पाठ्यांशे कतिपयानां सङ्ख्यावाचकशब्दानां रूपपरिचयः दीयते।

## III.1.लक्ष्याणि

एकैकस्य सङ्ख्यावाचकस्य कृते एकैकः स्वभावः विद्यते। ISOLATION= दूरतः , पृथक् , अद्वितीयतया=एकाकितया अवस्थानम्, सजातीयवस्त्वन्तरशून्यत्वम् एकस्य= एकशब्दस्य, स्वभावः अस्ति। अन्योन्यता, सहवासः, अविनाभावः, द्विशब्दस्य स्वभावः भवति। सजातीयवस्तुगतबहुत्वं त्र्यादीनां स्वभावः। एवं स्थिते सजातीयद्वितीयवस्तुनः शून्यत्वेन एकशब्दस्य, द्वित्व-बहुत्वबोधकत्वं नोपपद्यते। अतः एव एकशब्दः नित्यं एकवचनान्तः सम्पन्नः। एवम् एव,अविनाभावेन अवस्थानात् एकत्वस्य बोधकत्वं, सजातीय**तृतीय**वस्तुनः शून्यत्वेन बहुत्वस्य बोधकत्वं च द्विशब्दस्य नोपपद्यते। अतः द्विशब्दः नित्यं द्विवचनान्तः सम्पन्नः। सजातीयवस्तुगतबहुत्वस्यैव स्वभावत्वेन त्र्यादीनां एकत्व-द्वित्वयोः बोधकत्वं न उपपद्यते। अतः **त्रि** आदिशब्दाः नित्यं बहुवचनान्ताः सम्पन्नाः। एतत् स्वभावानुगुणतया एव त्रिषु लिङ्गेषु एक-द्वि शब्दरूपाणां स्वरूपबोधनम् अत्र उद्दिष्टम् अस्ति। एतत् पाठ्यांशस्य अध्ययनेन-

सङ्ख्यावाचकशब्दानां स्वभावं ज्ञातुं प्रभवति।

एकशब्दस्य नित्यैकवचनान्ततां समर्थयितुं पारयति।

द्विशब्दस्य नित्यद्विवचनान्ततायाः वाहकतां अवगच्छति।

एकशब्दस्य त्रिषु लिङ्गेषु एकवचनान्तरूपाणि पठितुं समर्थः भवति।

द्विशब्दस्य त्रिषु लिङ्गेषु द्विवचनान्तरूपाणि लिखितुं पारयति।

## III.2.संख्यावाचकशब्दाः

### III.2.1. 'एक' शब्दः (नित्यैकवचनान्तः)

#### III.2.1.1.अकारान्तः पुंलिङ्गः 'एक' शब्दः (नित्यैकवचनान्तः)

अकारान्तः पुंलिङ्गः 'एक' शब्दः (नित्यैकवचनान्तः)।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | एकः | ...... | ...... |
| द्वितीया | एकं | ...... | ...... |
| तृतीया | एकेन | ...... | ...... |
| चतुर्थी | एकस्मै | ...... | ...... |
| पञ्चमी | एकस्मात् | ...... | ...... |
| षष्ठी | एकस्य | ...... | ...... |
| सप्तमी | एकस्मिन् | ...... | ...... |

#### III.2.1.2.आकारान्तः स्त्रीलिङ्गः 'एका' शब्दः (नित्यैकवचनान्तः)

आकारान्तः स्त्रीलिङ्गः 'एका' शब्दः (नित्यैकवचनान्तः)।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | एका | ...... | ...... |
| द्वितीया | एकाम् | ...... | ...... |
| तृतीया | एकया | ...... | ...... |
| चतुर्थी | एकस्यै | ...... | ...... |
| पञ्चमी | एकस्याः . | ..... | ...... |
| षष्ठी | एकस्याः | ...... | ...... |
| सप्तमी | एकस्याम् | ...... | ...... |

#### III.2.1.3.अकारान्तः नपुंसकलिङ्गः 'एक' शब्दः (नित्यैकवचनान्तः)

अकारान्तः नपुंसकलिङ्गः 'एक' शब्दः (नित्यैकवचनान्तः)।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | एकम् | ...... | ...... |
| द्वितीया | एकम् | ...... | ...... |
| तृतीया | एकेन | ...... | ...... |
| चतुर्थी | एकस्मै | ...... | ...... |
| पञ्चमी | एकस्मात् | ..... | ...... |
| षष्ठी | एकस्य | ...... | ...... |
| सप्तमी | एकस्मिन् | ...... | ...... |

## III.2.2. 'द्वि' शब्दः (नित्यं द्विवचनान्तः)

### III.2.2.1.इकारान्तः पुंलिङ्गः 'द्वि' शब्दः (नित्यद्विवचनान्तः)

इकारान्तः पुंलिङ्गः **'द्वि'** शब्दः (नित्य द्विवचनान्तः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | ...... | द्वौ | ...... |
| द्वितीया | ...... | द्वौ | ...... |
| तृतीया | ...... | द्वाभ्याम् | ...... |
| चतुर्थी | ...... | द्वाभ्याम् | ...... |
| पञ्चमी | ...... . | द्वाभ्याम् | ...... |
| षष्ठी | ...... | द्वयोः | ...... |
| सप्तमी | ...... . | द्वयोः | ...... |

### III.2.2.2.इकारान्तः स्त्रीलिङ्गः 'द्वि' शब्दः (नित्यद्विवचनान्तः)

इकारान्तः स्त्रीलिङ्गः **'द्वि'** शब्दः (नित्य द्विवचनान्तः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | ...... | द्वे | ...... |
| द्वितीया | ...... | द्वे | ...... |
| तृतीया | ...... | द्वाभ्याम् | ...... |
| चतुर्थी | ...... | द्वाभ्याम् | ...... |
| पञ्चमी | ...... . | द्वाभ्याम् | ..... |
| षष्ठी | ...... | द्वयोः | ...... |
| सप्तमी | ...... . | द्वयोः | ...... |

### III.2.2.3.इकारान्तः नपुंसकलिङ्गः 'द्वि' शब्दः (नित्यद्विवचनान्तः)

इकारान्तः नपुंसकलिङ्गः **'द्वि'** शब्दः (नित्य द्विवचनान्तः)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुचवनम् |
|---|---|---|---|
| प्रथमा | ...... | द्वे | ...... |
| द्वितीया | ...... | द्वे | ...... |
| तृतीया | ...... | द्वाभ्याम् | ...... |
| चतुर्थी | ...... | द्वाभ्याम् | ...... |
| पञ्चमी | ...... . | द्वाभ्याम् | ...... |
| षष्ठी | ...... | द्वयोः | ...... |
| सप्तमी | ...... . | द्वयोः | ...... |

## III.3.उपसंहारः

एवम् अत्र सङ्ख्यावाचकेषु नित्य एकवचनान्तस्य एकशब्दस्य, नित्यद्विवचनान्तस्य द्विशब्दस्य,त्रिषु लिङ्गेषु सप्तसु विभक्तिषु च रूपाणि प्रदर्शितानि। एवम् एव त्र्यादीनां नित्यबहुवचनान्तशब्दानाम् अपि रूपाणि गुरूणाम् सहायेन ज्ञातव्यानि सन्ति। एवम् एतावत्पर्यन्तम् सर्वनामशब्देषु सङ्ख्यावाचकौ एक-द्विशब्दौ निरूपितौ।

## III.4.अभ्यासः

1.त्रिषु लिङ्गेषु, सप्तसु विभक्तिषु एकशब्दस्य रूपेषु साम्यं वैषम्यं च परिशीलयत ?

2.त्रिषु लिङ्गेषु, सप्तसु विभक्तिषु द्विशब्दस्य रूपेषु साम्यं वैषम्यं च परिशीलयत ?

# UNIT;II: धातवः

**II.0. परिचयः**

**II.1. लक्ष्याणि**

**II.2.धातूनां वैविध्यम्**

**II.2.1.परस्मैपदिनः**

**II.2.1.1.भ्वादिगणपठिताः परस्मैपदिनः धातवः**

**II.2.1.2.दिवादिगणपठिताः परस्मैपदिनः धातवः**

**II.2.2.आत्मनेपदिनः**

**II.2.3.उभयपदिनः**

**II.3.उपसंहारः**

**II.4.अभ्यासः**

## II.0 परिचयः

भाषाभागासु क्रियावाचकानां प्रमुखं स्थानम् अस्ति।क्रियापदं विना वाक्यं समग्रम् वा सम्पूर्णं वा अर्थं न ददाति। क्रियापदानि भूत-भविष्यत्- वर्तमानादिकं कालं (TENSES) ज्ञापयन्ति। सम्प्रश्न-प्रार्थनादिकान् मानसिकान् (भावान्)प्रकारान् (MOODS) च बोधयन्ति। प्रधम-मध्यम- उत्तम - आख्यान् पुरुषान् (PERSONS) सूचयन्ति। कर्तृगतां,कर्मगतां वा एकत्व-द्वित्व- बहुत्वसङ्ख्यां च निरूपयन्ति। संस्कृते क्रियावाचकाः एतादृशविशेषबोधकाः भवन्ति। एवंगुणविशेषणविशिष्टानां क्रियावाचकानां संस्कृतभाषायां धातवः इति व्यवहारः अस्ति। धातवः सामान्यतः क्रियां बोधयन्ति। कानि कानि धातुरूपाणि कालविशेषबोधकानि भवन्ति ? कानि धातुरूपाणि प्रकार (MOODS) विशेषबोधकानि भवन्ति? तानि च कीदृशं रूपं धरन्ति ? इत्यादयः प्रश्नाः उत्पद्यन्ते। तेषां प्रश्नानां समाधानपरतया धातूनां कश्चन परिचयः अत्र पाठ्यांशे उपलभ्यते।

## II.1. लक्ष्याणि

क्रियावाचकः संस्कृतधातुः एकैकः दशलकारान् धरति। एतेषु केचन कालम्, अपरे केचन विधि-सम्प्रश्न-प्रार्थनादिकं भावं च ज्ञापयन्ति। एकैकः लकारः त्रीन् पुरुषान् ,एकैकः पुरुषः त्रीणि पुरुषाणि च वहति। एकैकस्मिन् लकारे आहत्य नव(9)रूपाणि भवन्ति। एवम् आहत्य धातोः, दशानां लकाराणां कृते 10 x 9 = 90 रूपाणि (FORMS) विद्यन्ते। अयं पाठ्यांशः,तादृशानां केषाञ्चन धातूनां स्वरूपं निरूपयति। एवम् एतत् पाठ्यांशस्य अध्ययनेन -

अ).संस्कृतभाषायां क्रियावाचकानां धातुत्वव्यवहारम् अस्तीति जानाति।

इ).धातूनां प्रकारत्रयं पठितुं पारयति।

उ).परस्मैपद/ आत्मनेपदधातूनां स्वरूपं स्वभावं च स्थूलतः अवगच्छति।

ऋ).परस्मैपद/ आत्मनेपदधातूनां च दशलकारान् स्वरूपतः अवगच्छति।

ए).परस्मैपद/आत्मनेपदधातूनां कालबोधकलकारान्(Tenses)लिखितुं प्रभवति।

ऐ).परस्मैपद/आत्मनेपदधातूनां प्रकारबोधकलकारान्(Moods) भाषितुं प्रभवति।

ओ).परस्मैपद/आत्मनेपदधातूनां दशसु लकारेषु सर्वेषां रूपाणां स्थूलतः परिचयं सम्पादयति।

औ).परस्मैपद/आत्मनेपदधातुषु वर्तमाने लट्-भविष्यति लृट् रूपाणां रूपतः साम्यं वैषम्यं च जानाति।

अं).परस्मैपद/आत्मनेपदधातुषु भविष्यति लृट्-भविष्यति लृङ्रूपाणां आकृतिपरतया साम्यं वैषम्यं च जानाति।

## II.2.धातूनां वैविध्यम्

संस्कृतभाषायां क्रियावाचकाः धातवः इति उच्यन्ते। ते च स्वरूपतः स्वभावतः च भिन्नभिन्नाः भवन्ति। धातवः स्वभावतः, सकर्मकाः, अकर्मकाः, द्विकर्मकाः च भवन्ति। स्वरूपतः, परस्मैपदिनः आत्मनेपदिनः, उभयपदिनः च भवन्ति। रूपेषु मध्यगतं विकारम् पुरस्कृत्य अपि भ्वादयः, अदादयः, जुहोत्यादयः इत्येवं, धातवः दशधा वर्तन्ते। शुद्धधातवः, नामधातवः (कृत्रिमाः धातवः)इति च अपरः अपि कश्चन विभागः अस्ति। एवं स्थिते अयं पाठ्यांशः स्वरूपतः प्रवर्तमानं परस्मैपदि- आत्मनेपदि- उभयपदि-विभागे कतिपयान् धातून् सोदाहरणं निरूपयति।

### II.2.1. परस्मैपदिनः

संस्कृते धातवः स्वरूपतः 1.परस्मैपदिनः 2.आत्मेपदिनः 3.उभयपदिनः इति त्रिविधाः वर्तन्ते। तत्र याः क्रियाः परस्मै = परसमर्पकतया ,उपादीयन्ते, तत्क्रियावाचकाः धातवः परस्मैपदिनः इति उच्यन्ते। यथा- "सः भवति, सः अस्ति" इति वाक्यद्वयम् अस्ति। अत्र **भवति - अस्ति** इति उभे रूपे अपि परस्मैपदिसम्बन्धिनी एव। अत्र, तस्य भवनक्रिया परसमर्पकतया उपात्ता। सः परनिमित्तकतया भवति इत्यर्थः। सः परार्थम् अस्ति , न तु स्वार्थम् इत्येवम् अर्थं बोधयितुं परस्मैपदभूधातुः प्रयुक्तः। एवं परस्मैपदधातुषु सर्वेषु क्रियावाचकानाम् अर्थः परसमर्पकतया उपादानपर्यन्तं स्वीकार्यः इति बोध्यम्।

संस्कृतधातुरूपाणां **तिङन्तरूपाणि** इत्यपि व्याकरणशास्त्रे व्यवहारः अस्ति। तिङ् अन्ते येषां धातूनां तेषाम्(धातूनां) रूपाणि इत्यर्थः। अत्र तिङ् प्रत्याहारः।

| | | |
|---|---|---|
| तिप्-तस्-झि (प्रथमपुरुषः) | सिप्-थस्-थ (मध्यमपुरुषः) | मिप्-वस्-मस् (उत्तमपुरुषः) |
| त-आताम् झ (प्रथमपुरुषः) | थास्-आथाम्-ध्वम् (मध्यमपुरुषः) | इट्-वहि-महिङ् (उत्तमपुरुषः) |

अष्टादश एते च प्रत्ययाः। अत्र **ति** प्रभृति महिङ् इत्यत्र ङकारेण सह मिलित्वा तिङ् इति प्रत्याहारः जातः । तिङन्तरूपाणि इत्यस्य तिङ्प्रत्याहारान्तर्गतप्रत्ययान्तरूपाणि इत्यर्थः। ति प्रत्ययेषु च आदौ स्थिताः, तिप्-तस्-झि, सिप्-थस्-थ, मिप्-वस्-मस् , नव प्रत्ययाः येषां धातूनाम् भवन्ति, ते धातवः परस्मैपदिनः इति उच्यन्ते। एते प्रत्ययाः प्रति लकारस्य अन्ते योजिताः भवन्ति। एते लकाराः किञ्चत् किञ्चित् आगम-आदेश-लोप विकारान् च प्राप्य , परस्मैपदधातूनां दशलकाराणां रूपेषु दृश्यन्ते।

उपरि निर्दिष्टाः प्रत्ययाः परस्मैपदधातूनां दशसु लकारेषु कीदृशं विकारं प्राप्नुवन्ति इति स्थूलतया अत्र पट्टिकारूपेण जानीमः । परस्मैपदधातुलकारेषु रूपाणाम् अन्त्यभागाः परिचयार्थम् अत्र दीयन्ते। स्थूलतः तान् आधारीकृत्य परस्मैपदधातूनां लकाररूपाणि अवगन्तुं शक्नुमः।

**(1)वर्तमाने लट्** (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | ति | तः | न्ति |
| मध्यमपुरुषः | सि | थः | थ |
| उत्तमपुरुषः | आमि | आवः | आमः |

**(2) परोक्षे लिट्** ( UN-KNOWN PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अ | अतुः | उः |
| मध्यमपुरुषः | इथ/ठ | अथुः | अ |
| उत्तमपुरुषः | अ | इव | इम |

(3) **अनद्यतन भविष्यति लुट्** (DISTANT FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | ता | तारौ | तारः |
| मध्यमपुरुषः | तासि | तास्थः | तास्थ |
| उत्तमपुरुषः | तास्मि | तास्वः | तास्मः |

(4) **भविष्यति लृट्** (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | स्य/क्ष्य/ष्य/ति | स्य/क्ष्य/ष्य/तः | स्य/क्ष्य/ष्य/न्ति |
| मध्यमपुरुषः | स्य/क्ष्य/ष्य/सि | स्य/क्ष्य/ष्य/थः | स्य/क्ष्य/ष्य/थ |
| उत्तमपुरुषः | स्या/क्ष्या/ष्या/मि | स्या/क्ष्या/ष्या/वः | स्या/क्ष्या/ष्या/मः |

(5)**लोट् (विधि- आदिषु=** IMPERATIVE MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | तु,तात् | ताम् | न्तु |
| मध्यमपुरुषः | -.तात् | तम् | त |
| उत्तमपुरुषः. | आनि | आव | आम |

(6)**लङ् (अनद्यतन - भूते=** DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अ-त् | अ-ताम् | अ-न् |
| मध्यमपुरुषः | अ-: | अ-तम् | अ-त |
| उत्तमपुरुषः | अ-म् | अ-आव | अ-आम |

(7)**विधिलिङ् (विधि- आदिषु=** IMPERATIVE MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | एत् | एताम् | एयुः |
| मध्यमपुरुषः. | ए: | एतम् | एत |
| उत्तमपुरुषः. | एयम् | एव | एम |

(8) **अशिषि लिङ्** (BENEDICTORY MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | यात् | यास्ताम् | यासुः |
| मध्यमपुरुषः | याः | यास्तम् | यास्त |
| उत्तमपुरुषः | यासम् | यास्व | यास्म |

(9) **भूते लुङ्** (SIMPLE PAST )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अ-ईत् | अ-ताम् | अ-उः |
| मध्यमपुरुषः | अ-ईः | अ-तम् | अ-त |
| उत्तमपुरुषः | अ-अम् | अ-व | अ-म |

(10) **भविष्यति लृङ्** (CONDITIONAL )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अ-स्य/ष्य/क्ष्य/त् | अ-स्य/ष्य/क्ष्य/ताम् | अ-स्य/ष्य/क्ष्य/न् |
| मध्यमपुरुषः | अ-स्य/ष्य/क्ष्य/: | अ-स्य/ष्य/क्ष्य/तम् | अ-स्य/ष्य/क्ष्य/त |

| | | | |
|---|---|---|---|
| उत्तमपुरुषः | अ-स्य/ष्य/क्ष्य/म् | अ-स्य/ष्य/क्ष्य/आव | अ-स्य/ष्य/क्ष्य/आम |

उपरि निर्दिष्टा च पट्टिका परस्मैपदधातुसम्बन्धिलकाराणां पुरुषत्रये वचनत्रये च विद्यमानानां रूपाणां स्थूलस्वरूपं बोधयति। तत्र परस्मैपदिनः सरलाः, सुलभाः, वाक्येषु उपयोगाय अनुकूलाः इति ख्यातिम् आप्ताः।

### II.2.1.I.भ्वादिगणपठिताः परस्मैपदिनः धातवः

तिङन्तरूपेषु अंशत्रयं वर्तते। तत्र प्रथमः धातुः, द्वितीयः विकरणप्रत्ययः, तृतीयः तिङ् प्रत्ययः। एतेषु द्वितीयः अंशः विकरणप्रत्ययः,धातु(प्रथमांशस्य)-तिङ्(तृतीयांशस्य)-प्रत्यययोः मध्ये जायते। धातु-तिङ्प्रत्यययोः मध्ये जायमानम् एतं विकरणप्रत्ययम् इति कथयन्ति। एतम् अधारीकृत्य अपि कश्चन धातु विभागः प्रवृत्तः।तदनुसृत्य धातवः 1.भूवादयः 2.अदादयः 3.जुहोत्यदयः 4.दिवादयः 5.स्वादयः 6.तुदादयः 7.रुधादयः 8.तनादयः 9.क्री- आदयः 10.चुरादयः इति दशसु गणेषु पठिताः सन्ति। तत्र एकैकस्य गणस्य कृते स्वीयविधिविधानानि सन्ति। तथैव भूवादिगणपठितानाम् अपि धातूनां स्वस्वशास्त्रोक्तविधानानि सन्ति। भूवादि-गणपठितानां धातूनां शप् विकरणप्रत्ययः भवति। शप् प्रत्यये अकारः शिष्यते। तस्य योजनेन इगन्तस्य धातोः गुणः भवति। अयवादेशसन्धिश्च प्रवर्तते। एवमात्मना विकारं प्राप्य धातुः, केषुचित् लकारेषु, अकारान्ततां भजते । तस्य ति तः न्ति इत्यादयः योज्यन्ते। विशेषास्तु दशगणिप्रक्रियाद्वारा एव ज्ञातुं प्रभवामः।

### II.2.1.I.1.परस्मैपदिनः > भ्वादिगणपठिताः धातवः > भू - धातुः

**भू =सत्तायाम्, परस्मैपदी - भ्वादिः**

**(1) वर्तमाने लट्** (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवति | भवतः | भवन्ति |
| मध्यमपुरुषः | भवसि | भवथः | भवथ |
| उत्तमपुरुषः | भवामि | भवावः | भवामः |

**(2) परोक्षे लिट्** ( UN-KNOWN PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | बभूव | बभूवतुः | बभूवुः |
| मध्यमपुरुषः | बभूविथ | बभूवथुः | बभूव |
| उत्तमपुरुषः | बभूव | बभूविव | बभूविम |

**(3) अनद्यतन भविष्यति लुट्** (DISTANT FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविता | भवितारौ | भवितारः |
| मध्यमपुरुषः | भवितासि | भवितास्थः | भवितास्थ |
| उत्तमपुरुषः | भवितास्मि | भवितास्वः | भवितास्मः |

**(4) भविष्यति लृट्** (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

**(5)लोट् (विधि- आदिषु=** IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवतु,भवतात् | भवताम् | भवन्तु |
| मध्यमपुरुषः | भव,भवतात् | भवतम् | भवत |

| | | | |
|---|---|---|---|
| उत्तमपुरुषः | भवानि | भवाव | भवाम |

(6)लङ् (अनद्यतन - भूते= DISTANT PAST- TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अभवत् | अभवताम् | अभवन् |
| मध्यमपुरुषः | अभवः | अभवतम् | अभवत |
| उत्तमपुरुषः | अभवम् | अभवाव | अभवाम |

(7)विधिलिङ् (विधि- आदिषु= IMPERATIVE - MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | भवेत् | भवेताम् | भवेयुः |
| मध्यमपुरुषः. | भवेः | भवेतम् | भवेत |
| उत्तमपुरुषः. | भवेयम् | भवेव | भवेम |

(8) अशिषि लिङ् (BENEDICTORY MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | भूयात् | भूयास्ताम् | भूयासुः |
| मध्यमपुरुषः | भूयाः | भूयास्तम् | भूयास्त |
| उत्तमपुरुषः | भूयासम् | भूयास्व | भूयास्म |

(9) भूते लुङ् (SIMPLE PAST )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अभूत् | अभूताम् | अभूवन् |
| मध्यमपुरुषः | अभूः | अभूतम् | अभूत |
| उत्तमपुरुषः | अभूवम् | अभूव | अभूम |

(10) भविष्यति लृङ् (CONDITIONAL )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अभविष्यत् | अभविष्यताम् | अभविष्यन् |
| मध्यमपुरुषः | अभविष्यः | अभविष्यतम् | अभविष्यत |
| उत्तमपुरुषः | अभविष्यम् | अभविष्याव | अभविष्याम |

## II.2.1.I.2.परस्मैपदिनः > भ्वादिगणपठिताः धातवः (पठ - धातुः)

### पठ- व्यक्तायां वाचि - परस्मैपदी - भ्वादिः

(1)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |

(2) परोक्षे लिट् ( UN-KNOWN PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पपाठ | पेठतुः | पेठुः |
| मध्यमपुरुषः | पेठिथ | पेठथुः | पेठ |
| उत्तमपुरुषः | पपाठ/पपाठ | पेठिव | पेठिम |

**(3) अनद्यतन भविष्यति लुट्** (DISTANT FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिता | पठितारौ | पठितारः |
| मध्यमपुरुषः | पठितासि | पठितास्थः | पठितास्थ |
| उत्तमपुरुषः | पठितास्मि | पठितास्वः | पठितास्मः |

**(4) भविष्यति लृट्** (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

**(5)लोट् (विधि- आदिषु=** IMPERATIVE - MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठतु,पठतात् | पठताम् | पठन्तु |
| मध्यमपुरुषः | पठ,पठतात् | पठतम् | पठत |
| उत्तमपुरुषः. | पठानि | पठाव | पठाम |

**(6)लङ् (अनद्यतन - भूते= DISTANT PAST- TENSE))**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |

**(7)विधिलिङ् (विधि- आदिषु= IMPERATIVE - MOOD)**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठेत् | पठेताम् | पठेयुः |
| मध्यमपुरुषः. | पठेः | पठेतम् | पठेत |
| उत्तमपुरुषः. | पठेयम् | पठेव | पठेम |

**(8) अशिषि लिङ् (BENEDICTORY MOOD)**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठ्यात् | पठ्यास्ताम् | पठ्यासुः |
| मध्यमपुरुषः | पठ्याः | पठ्यास्तम् | पठ्यास्त |
| उत्तमपुरुषः | पठ्यासम् | पठ्यास्व | पठ्यास्म |

**(9) भूते लुङ् (SIMPLE PAST )**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपाठीत् | अपाठिष्टाम् | अपाठिषुः |
| मध्यमपुरुषः | अपाठीः | अपाठिष्टम् | अपाठिष्ट |
| उत्तमपुरुषः | अपाठिषम् | अपाठिष्व | अपाठिष्म |

**(10) भविष्यति लृङ् (CONDITIONAL )**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठिष्यत् | अपठिष्यताम् | अपठिष्यन् |
| मध्यमपुरुषः | अपठिष्यः | अपठिष्यतम् | अपठिष्यत |

| | | | |
|---|---|---|---|
| उत्तमपुरुषः | अपठिष्यम् | अपठिष्याव | अपठिष्याम |

## II.2.1.I.3.परस्मैपदिनः > भ्वादिगणपठिताः धातवः (जि - धातुः)

### जि =जये, परस्मेपदी - भ्वादिः

**(1)वर्तमाने लट्** (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जयति | जयतः | जयन्ति |
| मध्यमपुरुषः | जयसि | जयथः | जयथ |
| उत्तमपुरुषः | जयामि | जयावः | जयामः |

**(2) परोक्षे लिट्** ( UN-KNOWN PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जिगाय | जिग्यतुः | जिग्युः |
| मध्यमपुरुषः | जिगयिथ/जिगेथ | जिग्यथुः | जिग्य |
| उत्तमपुरुषः | जिगाय/जिगय | जिग्यिव | जिग्यिम |

**(3) अनद्यतन भविष्यति लुट्** (DISTANT FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जेता | जेतारौ | जेतारः |
| मध्यमपुरुषः | जेतासि | जेतास्थः | जेतास्थ |
| उत्तमपुरुषः | जेतास्मि | जेतास्वः | जेतास्मः |

**(4) भविष्यति लृट्** (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जेष्यति | जेष्यतः | जेष्यन्ति |
| मध्यमपुरुषः | जेष्यसि | जेष्यथः | जेष्यथ |
| उत्तमपुरुषः | जेष्यामि | जेष्यावः | जेष्यामः |

**(5)लोट् (विधि- आदिषु=** IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जयतु,जयतात् | जयताम् | जयन्तु |
| मध्यमपुरुषः | जय,जयतात् | जयतम् | जयत |
| उत्तमपुरुषः. | जयानि | जयाव | जयाम |

**(6)लङ् (अनद्यतन - भूते=** DISTANT PAST TENSE))

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अजयत् | अजयताम् | अजयन् |
| मध्यमपुरुषः | अजयः | अजयतम् | अजयत |
| उत्तमपुरुषः | अजयम् | अजयाव | अजयाम |

**(7)विधिलिङ् (विधि- आदिषु=** IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जयेत् | जयेताम् | जयेयुः |
| मध्यमपुरुषः. | जयेः | जयेतम् | जयेत |
| उत्तमपुरुषः. | जयेयम् | जयेव | जयेम |

(8) अशिषि लिङ् (BENEDICTORY MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जीयात् | जीयास्ताम् | जीयासुः |
| मध्यमपुरुषः | जीयाः | जीयास्तम् | जीयास्त |
| उत्तमपुरुषः | जीयासम् | जीयास्व | जीयास्म |

(9) भूते लुङ् (SIMPLE PAST )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अजैषीत् | अजैष्टाम् | अजैषुः |
| मध्यमपुरुषः | अजैषीः | अजैष्टम् | अजैष्ट |
| उत्तमपुरुषः | अजैषम् | अजैष्व | अजैष्म |

(10) भविष्यति लृङ् (CONDITIONAL )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अजेष्यत् | अजेष्यताम् | अजेष्यन् |
| मध्यमपुरुषः | अजेष्यः | अजेष्यतम् | अजेष्यत |
| उत्तमपुरुषः | अजेष्यम् | अजेष्याव | अजेष्याम |

## II.2.1.I.4.परस्मैपदिनः > भ्वादिगणपठिताः धातवः (दृशिर् (पश्य) धातुः)

## दृशिर् - प्रेक्षणे, (पश्य) परस्मैपदी, भ्वादिः

(1)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पश्यति | पश्यतः | पश्यन्ति |
| मध्यमपुरुषः | पश्यसि | पश्यथः | पश्यथ |
| उत्तमपुरुषः | पश्यामि | पश्यावः | पश्यामः |

(2) परोक्षे लिट् (UN-KNOWN PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ददर्श | ददृशतुः | ददृशुः |
| मध्यमपुरुषः | ददर्शिथ/दद्रष्ठ | ददृशथुः | ददृश |
| उत्तमपुरुषः | ददर्श | ददृशिव | ददृशिम |

(3) अनद्यतन भविष्यति लुट् (DISTANT FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | द्रष्टा | द्रष्टारौ | द्रष्टारः |
| मध्यमपुरुषः | द्रष्टासि | द्रष्टास्थः | द्रष्टास्थ |
| उत्तमपुरुषः | द्रष्टास्मि | द्रष्टास्वः | द्रष्टास्मः |

(4) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | द्रक्ष्यति | द्रक्ष्यतः | द्रक्ष्यन्ति |
| मध्यमपुरुषः | द्रक्ष्यसि | द्रक्ष्यथः | द्रक्ष्यथ |
| उत्तमपुरुषः | द्रक्ष्यामि | द्रक्ष्यावः | द्रक्ष्यामः |

(5)लोट् (विधि- आदिषु= IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पश्यतु,पश्यतात् | पश्यताम् | पश्यन्तु |
| मध्यमपुरुषः | पश्य,पश्यतात् | पश्यतम् | पश्यत |
| उत्तमपुरुषः. | पश्यानि | पश्याव | पश्याम |

6)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE))

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपश्यत् | अपश्यताम् | अपश्यन् |
| मध्यमपुरुषः | अपश्यः | अपश्यतम् | अपश्यत |
| उत्तमपुरुषः | अपश्यम् | अपश्याव | अपश्याम |

(7)विधिलिङ् (विधि- आदिषु= IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पश्येत् | पश्येताम् | पश्येयुः |
| मध्यमपुरुषः. | पश्येः | पश्येतम् | पश्येत |
| उत्तमपुरुषः. | पश्येयम् | पश्येव | पश्येम |

(8) अशिषि लिङ् (BENEDICTORY MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | दृश्यात् | दृश्यास्ताम् | दृश्यासुः |
| मध्यमपुरुषः | दृश्याः | दृश्यास्तम् | दृश्यास्त |
| उत्तमपुरुषः | दृश्यासम् | दृश्यास्व | दृश्यास्म |

(9) भूते लुङ् (SIMPLE PAST )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अद्राक्षीत् | अद्राष्टाम् | अद्राक्षुः |
| मध्यमपुरुषः | अद्राक्षीः | अद्राष्टम् | अद्राष्ट |
| उत्तमपुरुषः | अद्राक्षम् | अद्राक्ष्व | अद्राक्ष्म |

(10) भविष्यति लृङ् (CONDITIONAL )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अद्रक्ष्यत् | अद्रक्ष्यताम् | अद्रक्ष्यन् |
| मध्यमपुरुषः | अद्रक्ष्यः | अद्रक्ष्यतम् | अद्रक्ष्यत |
| उत्तमपुरुषः | अद्रक्ष्यम् | अद्रक्ष्याव | अद्रक्ष्याम |

## II.2.1.I.5. परस्मैपदिनः > भ्वादिगणपठिताः धातवः (गम्लृ धातुः)

### गम्लृ - गतौ, (गच्छ) परस्मैपदी, भ्वादिः

(1)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यमपुरुषः | गच्छसि | गच्छथः | गच्छथ |
| उत्तमपुरुषः | गच्छामि | गच्छावः | गच्छामः |

**(2) परोक्षे लिट् ( UN-KNOWN PAST TENSE)**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जगाम | जग्मतुः | जग्मुः |
| मध्यमपुरुषः | जगमिथ/जगन्थ | जग्मथुः | जग्म |
| उत्तमपुरुषः | जगाम/जगम | जग्मिव | जग्मिमम |

**(3) अनद्यतन भविष्यति लुट् (DISTANT FUTURE TENSE)**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गन्ता | गन्तारौ | गन्तारः |
| मध्यमपुरुषः | गन्तासि | गन्तास्थः | गन्तास्थ |
| उत्तमपुरुषः | गन्तास्मि | गन्तास्वः | गन्तास्मः |

**(4) भविष्यति लृट् (SIMPLE FUTURE TENSE)**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

**(5)लोट् (विधि- आदिषु= IMPERATIVE - MOOD)**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छतु, गच्छतात् | गच्छताम् | गच्छन्तु |
| मध्यमपुरुषः | गच्छ, गच्छतात् | गच्छतम् | गच्छत |
| उत्तमपुरुषः. | गच्छानि | गच्छाव | गच्छाम |

**(6)लङ् (अनद्यतन - भूते= DISTANT PAST- TENSE)**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यमपुरुषः | अगच्छः | अगच्छतम् | अगच्छत |
| उत्तमपुरुषः | अगच्छम् | अगच्छाव | अगच्छाम |

**(7)विधिलिङ् (विधि- आदिषु= IMPERATIVE - MOOD)**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छेत् | गच्छेताम् | गच्छेयुः |
| मध्यमपुरुषः. | गच्छेः | गच्छेतम् | गच्छेत |
| उत्तमपुरुषः. | गच्छेयम् | गच्छेव | गच्छेम |

**(8) अशिषि लिङ् (BENEDICTORY MOOD)**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गम्यात् | गम्यास्ताम् | गम्यासुः |
| मध्यमपुरुषः | गम्याः | गम्यास्तम् | गम्यास्त |
| उत्तमपुरुषः | गम्यासम् | गम्यास्व | गम्यास्म |

**(9) भूते लुङ् (SIMPLE PAST )**

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अगमत् | अगमताम् | अगमन् |
| मध्यमपुरुषः | अगमः | अगमतम् | अगमत |

| | | | |
|---|---|---|---|
| उत्तमपुरुषः | अगमम् | अगमाव | अगमाम |

(10) **भविष्यति लृङ्** (CONDITIONAL )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अगमिष्यत् | अगमिष्यताम् | अगमिष्यन् |
| मध्यमपुरुषः | अगमिष्यः | अगमिष्यतम् | अगमिष्यत |
| उत्तमपुरुषः | अगमिष्यम् | अगमिष्याव | अगमिष्याम |

## II.2.1.I.6. परस्मैपदिनः > भ्वादिगणपठिताः धातवः (पा धातुः)

### पा - पाने, (पिब) परस्मैपदी, भ्वादिः

(1)**वर्तमाने लट्** (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पिबति | पिबतः | पिबन्ति |
| मध्यमपुरुषः | पिबसि | पिबथः | पिबथ |
| उत्तमपुरुषः | पिबामि | पिबावः | पिबामः |

(2) **परोक्षे लिट्** ( UN-KNOWN PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पपौ | पपतुः | पपुः |
| मध्यमपुरुषः | पपिथ/पपाथ | पपथुः | पप |
| उत्तमपुरुषः | पपौ | पपिव | पपिम |

(3) **अनद्यतन भविष्यति लुट्** (DISTANT FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पाता | पातारौ | पातारः |
| मध्यमपुरुषः | पातासि | पातास्थः | पातास्थ |
| उत्तमपुरुषः | पातास्मि | पातास्वः | पातास्मः |

(4) **भविष्यति लृट्** (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पास्यति | पास्यतः | पास्यन्ति |
| मध्यमपुरुषः | पास्यसि | पास्यथः | पास्यथ |
| उत्तमपुरुषः | पास्यामि | पास्यावः | पास्यामः |

(5)**लोट् (विधि- आदिषु=** IMPERATIVE MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पिबतु, पिबतात् | पिबताम् | पिबन्तु |
| मध्यमपुरुषः | पिब, पिबतात् | पिबतम् | पिबत |
| उत्तमपुरुषः. | पिबानि | पिबाव | पिबम |

(6)**लङ् (अनद्यतन - भूते=** DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अपिबत् | अपिबताम् | अपिबन् |
| मध्यमपुरुषः | अपिबः | अपिबतम् | अपिबत |
| उत्तमपुरुषः | अपिबम् | अपिबाव | अपिबाम |

(7)विधिलिङ् (विधि- आदिषु= IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पिबेत् | पिबेताम् | पिबेयुः |
| मध्यमपुरुषः. | पिबेः | पिबेतम् | पिबेत |
| उत्तमपुरुषः. | पिबेयम् | पिबेव | पिबेम |

(8) अशिषि लिङ् (BENEDICTORY MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पेयात् | पेयास्ताम् | पेयासुः |
| मध्यमपुरुषः | पेयाः | पेयास्तम् | पेयास्त |
| उत्तमपुरुषः | पेयासम् | पेयास्व | पेयास्म |

(9) भूते लुङ् (SIMPLE PAST )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपात् | अपाताम् | अपुः |
| मध्यमपुरुषः | अपाः | अपातम् | अपात |
| उत्तमपुरुषः | अपाम् | अपाव | अपाम |

(10) भविष्यति लृङ् (CONDITIONAL )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपास्यत् | अपास्यताम् | अपास्यन् |
| मध्यमपुरुषः | अपास्यः | अपास्यतम् | अपास्यत |
| उत्तमपुरुषः | अपास्यम् | अपास्याव | अपास्याम |

## II.2.1.I.7.परस्मैपदिनः > भ्वादिगणपठिताः धातवः (ष्ठा धातुः)

### ष्ठा - गतिनिवृत्तौ, (तिष्ठ) परस्मैपदी, भ्वादिः

(1)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | तिष्ठति | तिष्ठतः | तिष्ठन्ति |
| मध्यमपुरुषः | तिष्ठसि | तिष्ठथः | तिष्ठथ |
| उत्तमपुरुषः | तिष्ठामि | तिष्ठावः | तिष्ठामः |

(2) परोक्षे लिट् ( UN-KNOWN PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | तस्थौ | तस्थतुः | तस्थुः |
| मध्यमपुरुषः | तस्थिथ | तस्थथुः | तस्थ |
| उत्तमपुरुषः | तस्थौ | तस्थिव | तस्थिम |

(3) अनद्यतन भविष्यति लुट् (DISTANT FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्थाता | स्थातारौ | स्थातारः |
| मध्यमपुरुषः | स्थातासि | स्थातास्थः | स्थातास्थ |
| उत्तमपुरुषः | स्थातास्मि | स्थातास्वः | स्थातास्मः |

(4) **भविष्यति लृट्** (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | स्थास्यति | स्थास्यतः | स्थास्यन्ति |
| मध्यमपुरुषः | स्थास्यसि | स्थास्यथः | स्थास्यथ |
| उत्तमपुरुषः | स्थास्यामि | स्थास्यावः | स्थास्यामः |

(5)**लोट्** (**विधि- आदिषु=** IMPERATIVE MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | तिष्ठतु, तिष्ठतात् | तिष्ठताम् | तिष्ठन्तु |
| मध्यमपुरुषः | तिष्ठ, तिष्ठतात् | तिष्ठतम् | तिष्ठत |
| उत्तमपुरुषः. | तिष्ठानि | तिष्ठाव | तिष्ठाम |

(6)**लङ्** (**अनद्यतन - भूते=** DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अतिष्ठत् | अतिष्ठताम् | अतिष्ठन् |
| मध्यमपुरुषः | अतिष्ठः | अतिष्ठतम् | अतिष्ठत |
| उत्तमपुरुषः | अतिष्ठम् | अतिष्ठाव | अतिष्ठाम |

(7)**विधिलिङ्** (**विधि- आदिषु=** IMPERATIVE MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | तिष्ठेत् | तिष्ठेताम् | तिष्ठेयुः |
| मध्यमपुरुषः. | तिष्ठेः | तिष्ठेतम् | तिष्ठेत |
| उत्तमपुरुषः. | तिष्ठेयम् | तिष्ठेव | तिष्ठेम |

(8) **अशिषि लिङ्** (BENEDICTORY MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | स्थेयात् | स्थेयास्ताम् | स्थेयासुः |
| मध्यमपुरुषः | स्थेयाः | स्थेयास्तम् | स्थेयास्त |
| उत्तमपुरुषः | स्थेयासम् | स्थेयास्व | स्थेयास्म |

(9) **भूते लुङ्** (SIMPLE PAST )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अस्थात् | अस्थाताम् | अस्थुः |
| मध्यमपुरुषः | अस्थाः | अस्थातम् | अस्थात |
| उत्तमपुरुषः | अस्थाम् | अस्थाव | अस्थाम |

(10) **भविष्यति लृङ्** (CONDITIONAL )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अस्थास्यत् | अस्थास्यताम् | अस्थास्यन् |
| मध्यमपुरुषः | अस्थास्यः | अस्थास्यतम् | अस्थास्यत |
| उत्तमपुरुषः | अस्थास्यम् | अस्थास्याव | अस्थास्याम |

## II.2.1.I.8.परस्मैपदिनः > भ्वादिगणपठिताः धातवः (वद धातुः)

### वद - व्यक्तायां वाचि, (वद) परस्मैपदी, भ्वादिः

(1)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | वदति | वदतः | वदन्ति |
| मध्यमपुरुषः | वदसि | वदथः | वदथ |
| उत्तमपुरुषः | वदामि | वदावः | वदामः |

(2) परोक्षे लिट् ( UN-KNOWN PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | जगाद | जगदतुः | जगदुः |
| मध्यमपुरुषः | जगदिथ | जगदथुः | जगद |
| उत्तमपुरुषः | जगाद/जगद | जगदिव | जगदिम |

(3) अनद्यतन भविष्यति लुट् (DISTANT FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | वदिता | वदितारौ | वदितारः |
| मध्यमपुरुषः | वदितासि | वदितास्थः | वदितास्थ |
| उत्तमपुरुषः | वदितास्मि | वदितास्वः | वदितास्मः |

(4) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | वदिष्यति | वदिष्यतः | वदिष्यन्ति |
| मध्यमपुरुषः | वदिष्यसि | वदिष्यथः | वदिष्यथ |
| उत्तमपुरुषः | वदिष्यामि | वदिष्यावः | वदिष्यामः |

(5)लोट् (विधि- आदिषु= IMPERATIVE MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | वदतु, वदतात् | वदताम् | वदन्तु |
| मध्यमपुरुषः | वद, वदतात् | वदतम् | वदत |
| उत्तमपुरुषः. | वदानि | वदाव | वदाम |

(6)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अवदत् | अवदताम् | अवदन् |
| मध्यमपुरुषः | अवदः | अवदतम् | अवदत |
| उत्तमपुरुषः | अवदम् | अवदाव | अवदाम |

(7)विधिलिङ् (विधि- आदिषु= IMPERATIVE MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | वदेत् | वदेताम् | वदेयुः |
| मध्यमपुरुषः. | वदेः | वदेतम् | वदेत |
| उत्तमपुरुषः. | वदेयम् | वदेव | वदेम |

(8) अशिषि लिङ् (BENEDICTORY MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | उद्यात् | उद्यास्ताम् | उद्यासुः |
| मध्यमपुरुषः | उद्याः | उद्यास्तम् | उद्यास्त |
| उत्तमपुरुषः | उद्यासम् | उद्यास्व | उद्यास्म |

(9) भूते लुङ् (SIMPLE PAST )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अवादीत् | अवादिष्टाम् | अवादिषुः |
| मध्यमपुरुषः | अवादीः | अवादिष्टम् | अवादिष्ट |
| उत्तमपुरुषः | अवादिषम् | अवादिष्व | अवादिष्म |

(10) भविष्यति लृङ् (CONDITIONAL )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अवदिष्यत् | अवदिष्यताम् | अवदिष्यन् |
| मध्यमपुरुषः | अवदिष्यः | अवदिष्यतम् | अवदिष्यत |
| उत्तमपुरुषः | अवदिष्यम् | अवदिष्याव | अवदिष्याम |

## II.2.1.I.9.परस्मैपदिनः > भ्वादिगणपठिताः धातवः (लिख् धातुः)

## लिख- अक्षर विन्यासे, (लिख्) परस्मैपदी > भ्वादिः

(1)वर्तमाने लट् (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | लिखति | लिखतः | लिखन्ति |
| मध्यमपुरुषः | लिखसि | लिखथः | लिखथ |
| उत्तमपुरुषः | लिखामि | लिखावः | लिखामः |

(2) परोक्षे लिट् ( UN-KNOWN PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | लिलेख | लिलिखतुः | लिलिखुः |
| मध्यमपुरुषः | लिलिखिथ | लिलिखथुः | लिलिख |
| उत्तमपुरुषः | लिलेख/लिलिख | लिलिखिव | लिलिखिम |

(3) अनद्यतन भविष्यति लुट् (DISTANT FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | लेखिता | लेखितारौ | लेखितारः |
| मध्यमपुरुषः | लेखितासि | लेखितास्थः | लेखितास्थ |
| उत्तमपुरुषः | लेखितास्मि | लेखितास्वः | लेखितास्मः |

(4) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | लेखिष्यति | लेखिष्यतः | लेखिष्यन्ति |
| मध्यमपुरुषः | लेखिष्यसि | लेखिष्यथः | लेखिष्यथ |
| उत्तमपुरुषः | लेखिष्यामि | लेखिष्यावः | लेखिष्यामः |

(5)लोट् (विधि- आदिषु= IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लिखतु, लिखतात् | लिखताम् | लिखन्तु |
| मध्यमपुरुषः | लिख, लिखतात् | लिखतम् | लिखत |
| उत्तमपुरुषः. | लिखानि | लिखाव | लिखाम |

(6)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अलिखत् | अलिखताम् | अलिखन् |
| मध्यमपुरुषः | अलिखः | अलिखतम् | अलिखत |
| उत्तमपुरुषः | अलिखम् | अलिखाव | अलिखाम |

(7)विधिलिङ् (विधि- आदिषु= IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लिखेत् | लिखेताम् | लिखेयुः |
| मध्यमपुरुषः. | लिखेः | लिखेतम् | लिखेत |
| उत्तमपुरुषः. | लिखेयम् | लिखेव | लिखेम |

(8) अशिषि लिङ् (BENEDICTORY MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लिख्यात् | लिख्यास्ताम् | लिख्यासुः |
| मध्यमपुरुषः | लिख्याः | लिख्यास्तम् | लिख्यास्त |
| उत्तमपुरुषः | लिख्यासम् | लिख्यास्व | लिख्यास्म |

(9) भूते लुङ् (SIMPLE PAST )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अलेखीत् | अलेखिष्टाम् | अलेखिषुः |
| मध्यमपुरुषः | अलेखीः | अलेखिष्टम् | अलेखिष्ट |
| उत्तमपुरुषः | अलेखिषम् | अलेखिष्व | अलेखिष्म |

(10) भविष्यति लृङ् (CONDITIONAL )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अलेखिष्यत् | अलेखिष्यताम् | अलेखिष्यन् |
| मध्यमपुरुषः | अलेखिष्यः | अलेखिष्यतम् | अलेखिष्यत |
| उत्तमपुरुषः | अलेखिष्यम् | अलेखिष्याव | अलेखिष्याम |

### II.2.1.I.10.परस्मैपदिनः > भ्वादिगणपठिताः धातवः (प्रच्छ् धातुः)

**प्रच्छ -ज्ञीप्सायाम् , (पृच्छ) परस्मैपदी, भ्वादिः**

(1)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पृच्छति | पृच्छतः | पृच्छन्ति |
| मध्यमपुरुषः | पृच्छसि | पृच्छथः | पृच्छथ |
| उत्तमपुरुषः | पृच्छामि | पृच्छावः | पृच्छामः |

(2) **परोक्षे लिट्** ( UN-KNOWN PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पप्रच्छ | पप्रच्छतुः | पप्रच्छुः |
| मध्यमपुरुषः | पप्रच्छिथ/पप्रष्ठ | पप्रच्छथुः | पप्रच्छ |
| उत्तमपुरुषः | पप्रच्छ | पप्रच्छिव | पप्रच्छिम |

(3) **अनद्यतन भविष्यति लुट्** (DISTANT FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | प्रष्टा | प्रष्टारौ | प्रष्टारः |
| मध्यमपुरुषः | प्रष्टासि | प्रष्टास्थः | प्रष्टास्थ |
| उत्तमपुरुषः | प्रष्टास्मि | प्रष्टास्वः | प्रष्टास्मः |

(4) **भविष्यति लृट्** (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | प्रक्ष्यति | प्रक्ष्यतः | प्रक्ष्यन्ति |
| मध्यमपुरुषः | प्रक्ष्यसि | प्रक्ष्यथः | प्रक्ष्यथ |
| उत्तमपुरुषः | प्रक्ष्यामि | प्रक्ष्यावः | प्रक्ष्यामः |

(5)**लोट्** (**विधि- आदिषु**= IMPERATIVE MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पृच्छतु, पृच्छतात् | पृच्छताम् | पृच्छन्तु |
| मध्यमपुरुषः | पृच्छ, पृच्छतात् | पृच्छतम् | पृच्छत |
| उत्तमपुरुषः. | पृच्छानि | पृच्छाव | पृच्छाम |

(6)**लङ्** (**अनद्यतन - भूते**= DISTANT PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अपृच्छत् | अपृच्छताम् | अपृच्छन् |
| मध्यमपुरुषः | अपृच्छः | अपृच्छतम् | अपृच्छत |
| उत्तमपुरुषः | अपृच्छम् | अपृच्छाव | अपृच्छाम |

(7)**विधिलिङ्** (**विधि- आदिषु**= IMPERATIVE MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पृच्छेत् | पृच्छेताम् | पृच्छेयुः |
| मध्यमपुरुषः. | पृच्छेः | पृच्छेतम् | पृच्छेत |
| उत्तमपुरुषः. | पृच्छेयम् | पृच्छेव | पृच्छेम |

(8) **अशिषि लिङ्** (BENEDICTORY MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | पृच्छ्यात् | पृच्छ्यास्ताम् | पृच्छ्यासुः |
| मध्यमपुरुषः | पृच्छ्याः | पृच्छ्यास्तम् | पृच्छ्यास्त |
| उत्तमपुरुषः | पृच्छ्यासम् | पृच्छ्यास्व | पृच्छ्यास्म |

(9) **भूते लुङ्** (SIMPLE PAST )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अप्राक्षीत् | अप्राष्टाम् | अप्राक्षुः |

| | | | |
|---|---|---|---|
| मध्यमपुरुषः | अप्राक्षीः | अप्राष्टम् | अप्राष्ट |
| उत्तमपुरुषः | अप्राक्षम् | अप्राक्ष्व | अप्राक्ष्म |

**(10) भविष्यति लृङ्** (CONDITIONAL )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अप्रक्ष्यत् | अप्रक्ष्यताम् | अप्रक्ष्यन् |
| मध्यमपुरुषः | अप्रक्ष्यः | अप्रक्ष्यतम् | अप्रक्ष्यत |
| उत्तमपुरुषः | अप्रक्ष्यम् | अप्रक्ष्याव | अप्रक्ष्याम |

## II.2.1.II. दिवादिधातवः

धातु-तिङ् प्रत्यययोः मध्ये जायमानं विकरणप्रत्ययम् आधारीकृत्य धातवः दशसु गणेषु पठिताः सन्ति । तेषु दशसु गणेषु दिवादिगणः चतुर्थः।दिवादिगणपठितेभ्यः धातुभ्यः श्यन् विकरणप्रत्ययः भवति। तत्र शकार-नकारौ इत्संज्ञकौ, लुप्तौ भवतः। धातु-तिङ् प्रत्यययोः मध्ये, नृत्य, नश्य इत्यादौ इव यकारः श्रूयते।

### II.2.1.II.1.परस्मैपदिनः > दिवादिगणपठिताः धातवः (नृत् धातुः)

**नृती - गात्रविक्षेपे , (नृत्) परस्मैपदी, दिवादिः**

**(1)वर्तमाने लट्** (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | नृत्यति | नृत्यतः | नृत्यन्ति |
| मध्यमपुरुषः | नृत्यसि | नृत्यथः | नृत्यथ |
| उत्तमपुरुषः | नृत्यामि | नृत्यावः | नृत्यामः |

**(2) परोक्षे लिट्** ( UN-KNOWN PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | ननर्त | ननृततुः | ननृतुः |
| मध्यमपुरुषः | ननर्तिथ | ननृतथुः | ननृत |
| उत्तमपुरुषः | ननर्त | ननृतिव | ननृतिम |

**(3) अनद्यतन भविष्यति लुट्** (DISTANT FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | नर्तिता | नर्तितारौ | नर्तितारः |
| मध्यमपुरुषः | नर्तितासि | नर्तितास्थः | नर्तितास्थ |
| उत्तमपुरुषः | नर्तितास्मि | नर्तितास्वः | नर्तितास्मः |

**4)A. भविष्यति लृट्** (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | नर्तिष्यति | नर्तिष्यतः | नर्तिष्यन्ति |
| मध्यमपुरुषः | नर्तिष्यसि | नर्तिष्यथः | नर्तिष्यथ |
| उत्तमपुरुषः | नर्तिष्यामि | नर्तिष्यावः | नर्तिष्यामः |

**4)B. भविष्यति लृट्** (SIMPLE FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | नर्त्स्यति | नर्त्स्यतः | नर्त्स्यन्ति |
| मध्यमपुरुषः | नर्त्स्यसि | नर्त्स्यथः | नर्त्स्यथ |
| उत्तमपुरुषः | नर्त्स्यामि | नर्त्स्यावः | नर्त्स्यामः |

(5)लोट् (विधि- आदिषु= IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नृत्यतु, नृत्यतात् | नृत्यताम् | नृत्यन्तु |
| मध्यमपुरुषः | नृत्य, नृत्यतात् | नृत्यतम् | नृत्यत |
| उत्तमपुरुषः. | नृत्यानि | नृत्याव | नृत्याम |

(6)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अनृत्यत् | अनृत्यताम् | अनृत्यन् |
| मध्यमपुरुषः | अनृत्यः | अनृत्यतम् | अनृत्यत |
| उत्तमपुरुषः | अनृत्यम् | अनृत्याव | अनृत्याम |

(7)विधिलिङ् (विधि- आदिषु= IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नृत्येत् | नृत्येताम् | नृत्येयुः |
| मध्यमपुरुषः. | नृत्येः | नृत्येतम् | नृत्येत |
| उत्तमपुरुषः. | नृत्येयम् | नृत्येव | नृत्येम |

(8) अशिषि लिङ् (BENEDICTORY MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नृत्यात् | नृत्यास्ताम् | नृत्यासुः |
| मध्यमपुरुषः | नृत्याः | नृत्यास्तम् | नृत्यास्त |
| उत्तमपुरुषः | नृत्यासम् | नृत्यास्व | नृत्यास्म |

(9) भूते लुङ् (SIMPLE PAST )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अनर्तीत् | अनर्तिष्टाम् | अनर्तिषुः |
| मध्यमपुरुषः | अनर्तीः | अनर्तिष्टम् | अनर्तिष्ट |
| उत्तमपुरुषः | अनर्तिषम् | अनर्तिषाव | अनर्तिषाम |

(10)A. भविष्यति लृङ् (CONDITIONAL MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अनर्तिष्यत् | अनर्तिष्यताम् | अनर्तिष्यन् |
| मध्यमपुरुषः | अनर्तिष्यः | अनर्तिष्यतम् | अनर्तिष्यत |
| उत्तमपुरुषः | अनर्तिष्यम् | अनर्तिष्याव | अनर्तिष्याम |

(10)B. भविष्यति लृङ् (CONDITIONAL MOOD )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अनर्त्स्यत् | अनर्त्स्यताम् | अनर्त्स्यन् |
| मध्यमपुरुषः | अनर्त्स्यः | अनर्त्स्यतम् | अनर्त्स्यत |
| उत्तमपुरुषः | अनर्त्स्यम् | अनर्त्स्याव | अनर्त्स्याम |

## II.2.1.II.2.परस्मैपदिनः > दिवादिगणपठिताः धातवः (नश् धातुः)

**णश - अदर्शने , (नश्) परस्मैपदी, दिवादिः**

(1)वर्तमाने लट् (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नश्यति | नश्यतः | नश्यन्ति |
| मध्यमपुरुषः | नश्यसि | नश्यथः | नश्यथ |
| उत्तमपुरुषः | नश्यामि | नश्यावः | नश्यामः |

(2) परोक्षे लिट् ( UN-KNOWN PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ननाश | नेशतुः | नेशुः |
| मध्यमपुरुषः | नेशिथ,ननंष्ठ | नेशथुः | नेशुः |
| उत्तमपुरुषः | नानश,ननश | नेशिव | नेशिम |

(3)A. अनद्यतन भविष्यति लुट् (DISTANT FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नशिता | नशितारौ | नशितारः |
| मध्यमपुरुषः | नशितासि | नशितास्थः | नशितास्थ |
| उत्तमपुरुषः | नशितास्मि | नशितास्वः | नशितास्मः |

(3)B. अनद्यतन भविष्यति लुट् (DISTANT FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नष्टा | नष्टारौ | नष्टारः |
| मध्यमपुरुषः | नष्टासि | नष्टास्थः | नष्टास्थ |
| उत्तमपुरुषः | नष्टास्मि | नष्टास्वः | नष्टास्मः |

(4)A. भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नशिष्यति | नशिष्यतः | नशिष्यन्ति |
| मध्यमपुरुषः | नशिष्यसि | नशिष्यथः | नशिष्यथ |
| उत्तमपुरुषः | नशिष्यामि | नशिष्यावः | नशिष्यामः |

(4)B. भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नङ्क्ष्यति | नङ्क्ष्यतः | नङ्क्ष्यन्ति |
| मध्यमपुरुषः | नङ्क्ष्यसि | नङ्क्ष्यथः | नङ्क्ष्यथ |
| उत्तमपुरुषः | नङ्क्ष्यमि | नङ्क्ष्यवः | नङ्क्ष्यमः |

(5)लोट् (विधि- आदिषु= IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | नश्यतु, नश्यतात् | नश्यताम् | नश्यन्तु |
| मध्यमपुरुषः | नश्य, नश्यतात् | नश्यतम् | नश्यत |
| उत्तमपुरुषः. | नश्यानि | नश्याव | नश्याम |

**(6)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)**

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अनश्यत् | अनश्यताम् | अनश्यन् |
| मध्यमपुरुषः | अनश्यः | अनश्यतम् | अनश्यत |
| उत्तमपुरुषः | अनश्यम् | अनश्याव | अनश्याम |

**(7)विधिलिङ् (विधि- आदिषु= IMPERATIVE MOOD)**

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | नश्येत् | नश्येताम् | नश्येयुः |
| मध्यमपुरुषः. | नश्येः | नश्येतम् | नश्येत |
| उत्तमपुरुषः. | नश्येयम् | नश्येव | नश्येम |

**(8) अशिषि लिङ्** (BENEDICTORY MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | नश्यात् | नश्यास्ताम् | नश्यासुः |
| मध्यमपुरुषः | नश्याः | नश्यास्तम् | नश्यास्त |
| उत्तमपुरुषः | नश्यासम् | नश्यास्व | नश्यास्म |

**(9) भूते लुङ्** (SIMPLE PAST )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अनशत् | अनशताम् | अनशन् |
| मध्यमपुरुषः | अनशः | अनशतम् | अनशत |
| उत्तमपुरुषः | अनशम् | अनशाव | अनशाम |

**(10)A. भविष्यति लृङ्** (CONDITIONAL MOOD )

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अनशिष्यत् | अनशिष्यताम् | अनशिष्यन् |
| मध्यमपुरुषः | अनशिष्यः | अनशिष्यतम् | अनशिष्यत |
| उत्तमपुरुषः | अनशिष्यम् | अनशिष्याव | अनशिष्याम |

**(10)B. भविष्यति लृङ्** (CONDITIONAL MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अनङ्क्ष्यत् | अनङ्क्ष्यताम् | अनङ्क्ष्यन् |
| मध्यमपुरुषः | अनङ्क्ष्यः | अनङ्क्ष्यतम् | अनङ्क्ष्यत |
| उत्तमपुरुषः | अनङ्क्ष्यम् | अनङ्क्ष्यव | अनङ्क्ष्यम |

**परस्मौपदधातूनाम् उपसंहारः**

एवम् अत्र पाठायांशे 'भू'आदिगणपठितेषु दश , दिवादिगणपठितेषु द्वौ च, आहत्य द्वादश परस्मैपदिनः धातवः निरूपिताः। सर्वेषां धातूनां दशसु लकारेषु साम्य-वैषम्यपूर्वकम् अध्ययनं विस्तृत-अवगाहनासम्पादनाय उपयुज्यते।

**SAQ:**1.भूधातोः लट् लकारे, प्रथमपुरुष-एकवचनम्।

2.पठधातोः लोट् लकारे, मध्यमपुरुष-एकवचनम्।

3.वदधातोः लृट् लकारे, उत्तमपुरुष-बहुवचनम्।

4.लिखधातोः लङ्लकारे, उत्तमपुरुषरूपाणि।

## II.2.2.आत्मनेपदिनः

संस्कृते धातूनां स्वरूपपरः विभागः कश्चित् अस्ति। तम् अनुसृत्य धातवः,1.परस्मैपदिनः 2.आत्मेपदिनः 3.उभयपदिनः इति त्रिविधाः वर्तन्ते इति पूर्वं पठितम्।तत्र याः क्रियाः आत्मने = स्वसमर्पकतया , उपादीयन्ते, तत्क्रियावाचकाः धातवः आत्मनेपदिनः इति उच्यन्ते।क्रियाफलम् आत्मगामि भवति इत्यर्थः। यथा- "सः कुरुते, सः वर्तते, सः वर्धते, सः लभते, सः यतते " इत्यादीनि वाक्यानि सन्ति। अत्र कुरुते, वर्तते, वर्धते, लभते, यतते "इत्येवमादीनि आत्मनेपदधातुरूपाणि।अत्र, तस्य करण-वर्तन-वर्धन- आप्ति- यतनक्रियाः, स्वसमर्पकतया उपात्ताः। एतत् क्रियाणां फलम् आत्मगामि भवति इत्यर्थः। सः, स्वार्थम् नाम स्वस्मै, करोति, स्वस्मै भवति, स्वस्मै वर्धते, न तु परस्मै नाम परार्थम्,इत्येवम् अर्थं बोधयितुं आत्मनेपदधातुरूपाणि प्रयेक्तव्यानि। एवं आत्मनेपदधातुषु सर्वेषु क्रियावाचकानाम् अर्थः, स्वसमर्पकतया उपादानपर्यन्तं स्वीकार्यः इति बोध्यम्।

संस्कृतधातुरूपाणां **तिङन्तरूपाणि** इत्यपि व्याकरणशास्त्रे व्यवहारः अस्ति।तिङ् अन्ते येषां धातूनां तेषाम् (धातूनां) रूपाणि इत्यर्थः। अत्र तिङ् प्रत्याहारः।

तिप्-तस्-झि (प्रथमपुरुषः) सिप्-थस्-थ (मध्यमपुरुषः) मिप्-वस्-मस् (उत्तमपुरुषः)

त-आताम् झ (प्रथमपुरुषः) थास्-आथाम्-ध्वम् (मध्यमपुरुषः) इट्-वहि-महिङ् (उत्तमपुरुषः)

अष्टादश एते च प्रत्ययाः। अत्र **ति** प्रभृति महिङ् इत्यत्र ङकारेण सह मिलित्वा तिङ् इति प्रत्याहारः जातः ।तिङन्तरूपाणि इत्यस्य तिङ्प्रत्याहारान्तर्गतप्रत्ययान्तरूपाणि इत्यर्थः ति प्रत्ययेषु च अन्ते स्थिताः त-आताम्-झ,थास्-आथाम्-ध्वम्, इट्-वहि-महिङ् , इति नव प्रत्ययाः येषां धातूनां भवन्ति, ते धातवः आत्मनेपदिनः इति उच्यन्ते। एते प्रत्ययाः किञ्चत् किञ्चित् आगम-आदेश-लोप विकारान् प्राप्य, प्रति लकारस्य अन्ते योजिताः भवन्ति।

उपरि निर्दिष्टाः प्रत्ययाः आत्मनेपदधातूनां दशसु लकारेषु कीदृशं विकारं प्राप्नुवन्ति इति स्थूलतया अत्र पट्टिका (TABLE) रूपेण दीयते। आत्मनेपदधातूनां लकारेषु अन्त्यभागाः परिचयार्थम् अत्र दीयन्ते। स्थूलतः तान् आधारीकृत्य आत्मनेपदधातूनां लकाररूपाणि अवगन्तुं शक्नुमः।

**(1)वर्तमाने लट्** (PRESENT TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ते | एते | न्ते |
| मध्यमपुरुषः | से | एथे | ध्वे |
| उत्तमपुरुषः | ए | आवहे | आमहे |

**(2)A. परोक्षे लिट्** ( UN-KNOWN PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ए | आते | रे |
| मध्यमपुरुषः | षे | आथे | ध्वे |
| उत्तमपुरुषः | ए | वहे | महे |

**(2)B. परोक्षे लिट्** ( UN-KNOWN PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | बभूव | बभूवतुः | बभूवुः |
| मध्यमपुरुषः | बभूविथ | बभूवथुः | बभूव |
| उत्तमपुरुषः | बभूव | बभूविव | बभूविम |

(2)C. परोक्षे लिट् ( UN-KNOWN PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | आस | आसतुः | आसुः |
| मध्यमपुरुषः | आसिथ | आसथुः | आस |
| उत्तमपुरुषः | आस | आसिव | आसिम |

(3) अनद्यतन भविष्यति लुट् (DISTANT FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ता | तारौ | तारः |
| मध्यमपुरुषः | तासे | तासाथे | ताध्वे |
| उत्तमपुरुषः | ताहे | तास्वहे | तास्महे |

(4) भविष्यति लृट् (SIMPLE FUTURE TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | स्य/क्ष्य/ष्य/ते | स्य/क्ष्य/ष्य/एते | स्य/क्ष्य/ष्य/न्ते |
| मध्यमपुरुषः | स्य/क्ष्य/ष्य/से | स्य/क्ष्य/ष्य/थे | स्य/क्ष्य/ष्य/ध्वे |
| उत्तमपुरुषः | स्ये/क्ष्ये/ष्ये | स्या/क्ष्या/ष्या/वहे | स्या/क्ष्या/ष्या/महे |

(5)लोट् (विधि- आदिषु= IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | ताम् | एताम् | न्ताम् |
| मध्यमपुरुषः | स्व | एथाम् | अध्वम् |
| उत्तमपुरुषः. | ऐ | आवहै | आमहै |

(6)लङ् (अनद्यतन - भूते= DISTANT PAST TENSE)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अ-त | अ-एताम् | अ-न्त |
| मध्यमपुरुषः | अ-थाः | अ-एथाम् | अ-ध्वम् |
| उत्तमपुरुषः | अ-ए | अ-आवहि | अ-आमहि |

(7)विधिलिङ् (विधि- आदिषु= IMPERATIVE MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | एत | एयाताम् | रन् |
| मध्यमपुरुषः. | एथाः | एयाथाम् | एध्वम् |
| उत्तमपुरुषः. | एय | एवहि | एमहि |

(8) अशिषि लिङ् (BENEDICTORY MOOD)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | षी/क्षी/सीष्ट | षी/क्षी/सीयास्ताम् | षी/क्षी/सीरन् |
| मध्यमपुरुषः | षी/क्षी/सीष्ठाः | षी/क्षी/सीयाथाम् | षी/क्षी/ध्वम् |
| उत्तमपुरुषः | षी/क्षी/सीय | षी/क्षी/सीवहि | षी/क्षी/सीमहि |

(9) भूते लुङ् (SIMPLE PAST )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अ-त | अ-आताम् | अ-त |
| मध्यमपुरुषः | अ-ष्ठाः | अ-थाम् | अ-ध्वम् |

| उत्तमपुरुषः | अ-इ | अ-वहि | अ-महि |
|---|---|---|---|

(10) **भविष्यति लृङ्** (CONDITIONAL MOOD)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | अ-स्य/ष्य/क्ष्य/त | अ-स्य/ष्य/क्ष्य/एताम् | अ-स्य/ष्य/क्ष्य/न्त |
| मध्यमपुरुषः | अ-स्य/ष्य/क्ष्य/थाः | अ-स्य/ष्य/क्ष्य/एथाम् | अ-स्य/ष्य/क्ष्य/ध्वम् |
| उत्तमपुरुषः | अ-स्ये/ष्ये/क्ष्ये/ | अ-स्य/ष्य/क्ष्य/आवहि | अ-स्य/ष्य/क्ष्य/आमहि |

उपरि निर्दिष्टा च पट्टिका आत्मनेपदधातुसम्बन्धिलकाराणां पुरुषत्रये वचनत्रये च विद्यमानानां रूपाणां स्थूलस्वरूपं बोधयति।

## II.2.2.1. भ्वादिगणपठिताः आत्मनेपदिनः धातवः

तिङन्तरूपेषु अंशत्रयं वर्तते। तत्र प्रथमः धातुः, द्वितीयः विकरणप्रत्ययः, तृतीयः तिङ् प्रत्ययः। एतेषु द्वितीयः अंशः विकरणप्रत्ययः,धातु(प्रथमांशस्य)-तिङ्(तृतीयांशस्य)-प्रत्यययोः मध्ये जायते। धातु-तिङ्प्रत्यययोः मध्ये जायमानम् एतं विकरणप्रत्ययम् इति कथयन्ति। तम् अधारीकृत्य अपि कश्चन धातुविभागः प्रवृत्तः। तदनुसृत्य धातवः 1.भूवादयः 2.अदादयः 3.जुहोत्यदयः 4.दिवादयः 5.स्वादयः 6.तुदादयः 7.रुधादयः 8.तनादयः 9.क्री- आदयः 10.चुरादयः इति दशसु गणेषु पठिताः सन्ति। आत्मनेपदिधातवः दशसु अपि लकारेषु उपलभ्यन्ते। तत्र एकैकस्य गणस्य कृते स्वीयविधिविधानानि सन्ति। तथैव भूआदिगणपठितानाम् अपि धातूनां स्वस्वशास्त्रो- क्तविधानानि सन्ति। भूवादि-गणपठितानां धातूनां शप् विकरणप्रत्ययः भवति। शप् प्रत्यये अकारः शिष्यते। तस्य योजनेन इगन्तस्य धातोः गुणः भवति। अयवादेशसन्धिश्च प्रवर्तते। एवमात्मना विकारं प्राप्य धातुः, केषुचित् लकारेषु, अकारान्ततां भजते। तस्य **त आताम् झ** इत्यादयः आत्मनेपदप्रत्ययाः योज्यन्ते। विशेषास्तु दशगणि प्रक्रियाद्वारा ज्ञातुं प्रभवामः।

## II.2.2.1.1. आत्मनेपदिनः > भ्वादिगणपठिताः धातवः > एध धातुः

### एध - वृद्धौ, (एध) आत्मनेपदी, भ्वादिः

(1)**वर्तमाने लट्** (PRESENT TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | एधते | एधेते | एधन्ते |
| मध्यमपुरुषः | एधसे | एधेथे | एधध्वे |
| उत्तमपुरुषः | एधे | एधावहे | एधामहे |

(2)A. **परोक्षे लिट्** ( UN-KNOWN PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | एधाञ्चक्रे | एधाञ्चक्राते | एधाञ्चक्रिरे |
| मध्यमपुरुषः | एधाञ्चकृषे | एधाञ्चक्राथे | एधाञ्चकृध्वे |
| उत्तमपुरुषः | एधाञ्चक्रे | एधाञ्चकृवहे | एधाञ्चकृमहे |

(2)B. **परोक्षे लिट्** ( UN-KNOWN PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | एधाम्बभूव | एधाम्बभूवतुः | एधाम्बभूवुः |
| मध्यमपुरुषः | एधाम्बभूविथ | एधाम्बभूवथुः | एधाम्बभूव |
| उत्तमपुरुषः | एधाम्बभूविव | एएधाम्बभूविव | एधाम्बभूविम |

## (2)C. परोक्षे लिट् ( UN-KNOWN PAST TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | एधामास | एधामासतुः | एधामासुः |
| मध्यमपुरुषः | एधामासिथ | एधासथुः | एधामास |
| उत्तमपुरुषः | एधामास | एधामासिव | एधामासिम |

## (3) अनद्यतन भविष्यति लुट् (DISTANT FUTURE TENSE)

| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | एधिता | एधितारौ | एधितारः |
| मध्यमपुरुषः | एधितासे | एधितासाथे | एधिताध्वे |
